CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

काव्यशास्त्रीयं पर्यालोचनम्

**
*
**

कमला सुवेदी

**
*
**

तारा प्रकाशन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

काव्यशास्त्रीयं पर्यालोचनम्

कमला सुवेदी

तारा प्रकाशन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रकाशकः–

तारा प्रकाशन

बागबजार, काठमाडौं, नेपाल ।

संस्करणम् प्रथमम्

प्रकाशनवर्षः २०४६ वैक्रमाब्दे ।

मूल्यम् ६० रुप्यकाणि

मुद्रकः–

लुष प्रेस

ख- १।३७२ बानेश्वर काठमाडौं ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समर्पणम्

व्याकरण-काव्य-धर्मशास्त्रादि-विविध-विद्या-निष्णातानां
पुण्यश्लोकानां पितामहचरणानामर्ज्यालयोपाह्वानां
रश्मिराजशर्मणां शतवार्षिकीं पुण्यतिथिमुद्दिश्य,
शब्दप्रसूनाञ्जलिमुपाहरति ।

विनीता नप्त्री
कमला सुवेदी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूज्यपादानां श्रीषड्युतानां बडागुरुज्यूपदमलङ्कुर्वताम्

शुभाशंसा

सौभाग्यवत्या कमलादेव्या संस्कृतभाषानिबद्धः साहित्यशास्त्रविषयको लघुग्रन्थः समधिगतः । साहित्यशब्दः सहभावं, संश्लेषणं, समन्वयं, योगं, सम्यक्हितं, निःश्रेयसञ्चाभिदधाति । शक्तिसम्पन्नस्य शब्दस्य, अर्थस्य च सहभावः साहित्यस्य उपादानम् । एतस्मिन् सहभावे "शब्दार्थयोः सहृदयहृदयाह्लादकारिपरमसुभगसाम्येन स्थितिरावश्यकी" ।

"साहित्यमनयोः शोभाशालितां प्रतिकाप्यसौ ।
अन्यूनानतिरिक्तत्वमनोहारिण्यवस्थितिः" ।

सहभावेन उपादानेन निष्पन्नस्य साहित्यस्य उपादेयतापि सहभाव एव निहिता वर्तते । सहभावतः प्राप्तस्वरूपं साहित्यं सहभावमेव सृजति । साहित्यभोक्तुर्हृदये सहभावोद्भावनसमर्थं साहित्यमत एव सफलमिति गीयते । साहित्यस्य प्रयोजकोऽपि प्रयोजनमपि सहभाव एव मन्यते । सहभावः साहित्यस्य लक्ष्यः, समन्वयः साहित्यस्य साध्यः, योगः साहित्यस्य लक्ष्यः, सम्यक्हितम् निःश्रेयसं साहित्यस्य उद्देश्यमिति मम मतम् ।

दीर्घकालतः अर्जितेन संस्कृतसाहित्यशास्त्रशिक्षणानुभवेन सम्मार्जिता, परिष्कृता च कमलादेव्या व्युत्पत्तिः प्रतिभा च अस्मिन्निबन्धे सुष्ठु नियोजिता दृश्यते । एतस्या विदुष्या अस्मिन् लघुग्रन्थे साहित्यसम्बद्धा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नां प्रधानविषयाणां सम्यङ् निरूपणे, प्रतिपादने च विहितः प्रयासः मर्मज्ञैः सहृदयैः प्रशस्यो भवेदिति मन्ये । सोऽयं ग्रन्थः संस्कृतसाहित्यशास्त्राध्येतॄणां छात्राणां कृते प्रधानविषयव्युत्पादने लाभप्रदो भविष्यतीति मम विश्वासः ।

सौभाग्यवती श्रीकमलादेवी श्रीसरस्वतीवरप्रसादान् सततं प्राप्नुयात् इति शुभमाशासे ।

अम्बिकाप्रसादः अधिकारी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संस्तवः

आयुष्मत्याः कमलादेव्याः कृतिरेषा मया विलोकिता । कृतिरियं कलेवरेण नाति बृहती, अथापि विषयनिबन्धनदृष्ट्या पौरस्त्यकाव्यशास्त्रीयतत्त्वानां विवेचनमस्यां सौष्ठवेन पाटवेन च विहितमस्तीत्यस्याः कलेवरलघुता द्रुततरस्य पर्यायभूतेति विभावये ।

सत्यम्– भौतिकविकासजन्योऽधुनातनः परिवेषः पूर्णतया यान्त्रिकोजातः– कम्प्यूटरायमाणः । अतो हेतो रशनम् वसनम् वार्तालापः यत्रतत्र सर्वत्रैव संक्षिप्ततां द्रुततां वा कामयते जनः । ग्रन्थोऽपि बृहदाकृतिकः पाठकानां अध्येतॄणाञ्च क्लेशावहो भवतीति बृहद्ग्रन्थोऽधुना केवलं पुस्तकागारस्य शोभां वर्धयति । अस्मिन् द्रुतयुगे– जनोबृहत्कायस्य पुस्तकस्य तुरीयांशमपि धैर्येण न पठति । अतएव ग्रन्थकर्त्र्याः पञ्चसु परिच्छेदेषु परिच्छिन्न एव लघुग्रन्थः अधुनातनानां– मिनीयुगीनानां– पौरस्त्य काव्यशास्त्रस्य विदुषामधीयानानां छात्राणाञ्च समाजे लोकप्रियो भविष्यतीति मदीया द्रढीयसी धारणा ।

एषा कृतिः पौरस्त्यकाव्यसिद्धान्त–रस–गुण–वक्रोक्ति–काव्यशरीर प्रभृतिषु गहनेषु गभीरेषु च विषयेषु स्फुटं प्रकाशं विकिरति । संक्षिप्य भावाभिव्यञ्जने, सौष्ठवेन अञ्जसा च तथ्यप्रतिपादने चारुतया वाक्यनिगुम्फने च ग्रन्थकर्त्र्याः श्रमः प्रशंसनीयो वर्तते ।

नैपालकेषु संस्कृतवाङ्मयसम्बद्धेषु काव्यशास्त्रीयग्रन्थेषु विद्वच्छिरोमणेः कुलचन्द्रगौतमस्य "अलङ्कारचन्द्रोदयः" पण्डितराजस्य सोमनाथ सिग्द्यालस्य "साहित्यप्रदीपः" आचार्योपनामकस्य शिवराजविदुषः "काय-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रकाशटीका" चेति सङ्कलय्य त्रयोग्रन्थाः प्रकाशिताः उपलभ्यन्ते । प्रस्तुतेयं कृतिस्तस्यामेवकोटौ समयक्रमेण कनिष्ठतां भजते ।

कमलादेव्याः वैदुष्यं संस्कृतंप्रति निष्ठा च कुठारनिर्माणाय प्रस्तर घर्षणमिव नास्ति वस्तुत इदं वैदुष्यं इयं निष्ठाचोभयमपि पैतृकमानुवंशिकं पारम्परिकसंस्कारोद्बुद्धं वर्तते । इयं विदुषी आचार्यपरीक्षोत्तीर्णा प्रथमा नैपालिका महिलास्तीति नेपालकस्य महिलासमाजस्य गौरवभूता च । "यशधनानांहि यशोगरीयः" । ग्रन्थकर्त्र्या यशोऽनुदिनं वर्धताम् । अस्या लेखनी च विश्रान्तामास्तु । इत्याशीर्वचोभिः शिवम् ।

विष्णुराज आत्रेयः
सह–प्राध्यापकः
महेन्द्रसंस्कृतविश्वविद्यालयः
५।२०४६ वि. सं.

ग–२–४२ बत्तीसपुतली
काष्ठमण्डप, नेपाल ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रासङ्गिकी

अध्ययनाऽध्यापनप्रसङ्गे काव्यसिद्धान्तविषयको यः स्थायिभावो हृदि बीजरूपेणाभवत् तस्यैव लिपिबद्धं पल्लवनमधुना लघुप्ररोहोभूत्वा सहृदयानां स्नेहं संरक्षणञ्च कामयमाना सौभाग्येन भवतां कररमलयोः स्पर्शसुखमनुभवति । अत एवास्य पुस्तकप्ररोहस्यायतिर्भवदायत्ता ।

अस्मिन् प्रसङ्गे श्रीषट्काञ्चितानां बडागुरुज्युपदमलङ्कुर्वतां अम्बिकाप्रसादाधिकारिमहाभागानां शुभाशंसा, अग्रजवर्य्याणां विदुषां विष्णुराज आत्रेयमहोदयानां संस्तवश्च लघोरप्यस्य महत्त्वं वर्धयत इति उभयेषामपि कृतकृत्यमहं वहामि ।

अस्मद्गुरुचरणाः निर्गुणोपाभिधा द्विजेन्द्रनाथमिश्र "निर्गुण" महाभागाः विशेषतो वन्द्याः । येषामभिप्रेरणया कार्येऽस्मिन्नहं संलग्ना ।

ताराप्रकाशनमपि धन्यं वदामि येन कृतिरियं प्रकाशतां नीता ।

यदिचेदिदं शास्त्रैकरसलोलुपानां स्नेहभाजामध्येतॄणाञ्च प्रमोदाय तोषाय चाऽभविष्यत् तदैव मम प्रयासः साफल्यमैष्यत् ।

विदुषां कृपाकाङ्क्षिणी

कमला सुवेदी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषय-सूची

१. काव्यशास्त्रीयतत्त्वे वैहङ्गमो दृष्टिः १–१०

गुणात्मवादः १ । वक्रोक्तिवादः २ । रसात्मवादः (भरतः) ८ ।

२. काव्यकलेवरविचारः ११–२९

प्राधान्य विचारः १५ । काव्यार्थविचारः २१ ।

३. रससिद्धान्तः ३०–४५

औपनिषदभूमिका: ३० । प्रेमसौन्दर्यवाक: ३१ । ब्रह्मरसवादः ३२ ।आत्मवादचर्चा ३३ । शास्त्रप्रामाण्यवादः ३७ । मीमांसा-शैली: ३७ । विकासमतखण्डनम् ३९ । काव्यानन्दविमर्शः ४० । मतान्तरोन्मूलनम्: ४३ । श्रीकृष्णद्वैपायनमतम् ४४ ।

४. ध्वनिसिद्धान्त ४६–५५

व्यञ्जना ४८ ।

५. साहित्यमीमांसा ५६–८३

अभिव्यक्तिवादः ६१ । व्यापारप्राधान्ये काव्यधीः ६९ । व्यञ्जनाविषये भाष्यकारमतम् ७२ । शक्तिस्वरूपविमर्शः ७३ । प्रतिभा-स्वरूपमीमांसा ७६ । रुद्रटमतम् ७९ । मम्मटमतम् ८० ।

६. सन्दर्भग्रन्थानां सूची ८५–८६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

काव्यशास्त्रीयतत्त्वे वैहङ्गमी दृष्टिः

"साहित्यशास्त्रे" काव्य–साहित्यालङ्कारगुणरीतिवक्रोक्तिध्वनिरसौचित्यदोषाणामध्ययनं भवति । काव्यरसनिष्पादकं तत्त्वमस्ति साहित्यम् । भगवता व्यासेनाग्निपुराणे महाकाव्यलक्षणनिर्वचनप्रसंगेन सर्वेषामपि काव्यतत्त्वानां परिगणना कृता । दण्डि–भामहाभ्यां काव्यमीमांसाया दार्शनिकं भूमिपृष्ठं निर्मितम् । दण्डिप्रतिपादितानां काव्यसिद्धान्तानामाधारेणैव हिन्दीसाहित्याचार्येण केशवदासेन 'कविप्रिया' नामा भाषाग्रन्थोऽव्यरचि । काव्यादर्शस्यानुवादाः कनन्नड–सिंहल–भोट हिन्दीभाषासु सञ्जाताः । भरतव्यासयोरनन्तरंदण्डिनः प्रथमाचार्यत्वमुपकल्पयन्ति विद्वांसः । काव्ये गुणानां प्राधान्यस्यव्यवस्थापयितुराचार्यदण्डिनो मतानुसारेणैव वामनाचार्येणापि रीतेः काव्यात्मत्वं प्रतिज्ञाय 'विशेषश्च गुणात्मा काव्यः' इति न्यायः सिद्धान्तितः । एवमैतिहासिकदृष्ट्या 'गुणात्मवादः' प्राथम्यं भजते ।

१. गुणात्मवादः

भारतीयसाहित्यशास्त्रे 'गुणः काव्यात्मा' इति सिद्धान्तः दण्डिना प्रतिष्ठापितः । अयमेव 'सौशब्द्यसिद्धन्तोऽस्ति यस्य चर्चा तत्पूर्ववर्तिना भामहेन' तदेतदाहुः सौशब्द्यं इति वदता कृता आसीत् । काव्येषु कविविवक्षितार्थप्रतिपादकानां शब्दानां प्रामुख्यं दण्डिना सर्वप्राथम्येनोद्घुष्टं यमवलम्ब्य कालान्तरे पण्डितजगन्नाथेन, जगन्नाथेनाऽपिसहृदयहृदयाह्लादजनकभावनाविषयार्थप्रतिपादकशब्दत्वं काव्यत्वमिति निर्णीतशब्दानां विन्यासविशेषस्यैव प्रथमतः सहृदयहृदयाह्लादजनकत्वात्, शब्दज्योतिरेव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

काव्यामृतमूलम् । दण्डिनः पदलालित्यं दशकुमारचरिताख्यगद्यकाव्यपरिशीलनेनापि व्यक्तोभवति । दण्डिनोऽपरमिदमस्ति वैशिष्ट्यं यत्स काव्यमीमांसायाः प्रारम्भं सूक्तितः करोति । सूक्ति (मुक्तकं) रेव प्रथमः काव्यविधिः । प्रबन्धकाव्येषु रसस्य जीवितत्वं व्यासाचार्येणाग्निपुराणे व्यवस्थापितमेव । सूक्तीनामलङ्कारत्वसाधनता अर्थान्तरोदाहरणालङ्कारादौ स्पष्टा । गुणात्मवादस्थापनादतिरिक्तमलङ्कार–निरूपणेऽपि दण्डिनः वैशिष्ट्यमस्ति । तन्मते काव्यशोभाकराधर्मा एवालङ्कारपदवाच्याः । रसानामलङ्कारत्वेनाङ्गीकारोऽपरं वैशिष्ट्यम् ।

२. वक्रोक्तिवादः

सर्वालङ्कारमूलामिमां वैदग्ध्यभङ्गीभणितिस्वभावां वक्रोक्तिमेवालङ्कारमूलं भामहाचार्यो मनुते । शब्दाभिधेयभेदेन द्विविधानामप्यलङ्काराणां काव्ये स्थितिः, परन्तु वक्रोक्तेः सर्वालङ्कारमूलत्वेनार्थविभावकतया काव्यजीवितत्वम् । तन्मतेऽलङ्कारसामान्यलक्षणमस्ति 'वक्राभिधेयशब्दोक्तिरिष्टावाचामलङ्कृतिः ।

केषाञ्चिन्मतानेसारेण भामहवक्रोक्तिरतिशयोक्तिपर्यायमात्रमलङ्कारः । परन्तु नव्यानां मतानुसारेण काव्ये सूक्तिवैचित्र्यमूलावक्रोक्तिः, अतिशयोक्तिस्तु लोकोत्तरार्थगोचरतामूलम् । रमणीयताबीजं वक्रोक्तिः, चमत्कारमूलमतिशयोक्तिः । रमणीयतायां भावप्राधान्यं चमत्कारानुभवेबुद्धेः प्राधान्यमितिविवेकः ।

वक्रोक्ति–स्वभावोक्तिभेदेन वाङ्मयस्य द्वैविध्यमुच्यते । कुत्रापि वक्रोक्त्यतिशयोक्त्योः साम्यं नोक्तं वक्रोक्तेः काव्यात्मत्वमेव व्यवस्थापयता कुन्तकाचार्येण । उत्तरवर्तिभिरालङ्कारिकैरपि वक्रोक्तेरतिशयोक्तेरलङ्काररूपत्वभिन्नत्वञ्चाङ्गीकृतम् । अयं वक्रोक्त्यात्मवाद एवालङ्काराणां काव्ये प्राधान्यं व्यवस्थापयति ।

काव्येषु 'गुणानामेव प्राधान्यमिति' अलङ्काराणां प्राधान्यमिति द्वयोः पक्षयोरस्तित्वमस्त्येव । गुणालङ्कारयोरन्तरं किमिति विचार्य वामनाचार्येणोक्तं यत्काव्यशोभायाः कर्त्तारो धर्माः गुणाः । काव्यशोभाया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अतिशयहेतवोऽलङ्काराः । तन्मते 'रीतिरात्मा काव्यस्य' । विशिष्टा पद-रचनारीतिः । विशेषश्च गुणात्मा । काव्यं ग्राह्यमलङ्कारात् । सौन्दर्य-मलङ्कारः ।

दण्डिनः 'शोभा' वामनस्य सौन्दर्यमेवेति प्रतीयते । शोभातिशया-धायकत्वमलङ्काराणां दण्डिवामनोभयाविरुद्धम् ।

नैघण्टुककाण्डे 'शुभम्' पदं जलपर्यायम् । शुभधात्वर्थाक्रान्तत्वात्-शोभापदं सरसत्वपर्यायम् । 'सुषमा परमाशोभा, शोभाकान्तिर्धुति – – इत्यमरः । कुन्तकाचार्येणालङ्कारनिरुक्तिप्रसङ्गेनोक्तं शोभाशून्यतयां–शोभाकान्तिस्तयाशून्यं रहितं शोभाशून्यं तस्य भावः शोभा–शून्यता, तया हेतुभूतयालङ्करणत्वमनुपपन्नम् इति । कान्ति–सरसतयोः (शोभायाः) चमत्कृतार्थवोध तदुत्तरमनुभूयमानभावानुभवे च तात्पर्यात् शोभापदमर्थ-वत् । तत्रापि चमत्कृततैव निबन्धेऽलङ्काराणां भावानुभूतौ सरसतायाश्च तारतम्यमाकलयन्ति ।

प्रबन्धे एकस्यैव रसस्याङ्गित्वेनोपनिबन्धनेनार्थविशेषस्योत्कर्षो भवति । रूपकोपमातुल्ययोगितानिदर्शनाद्यलङ्कारेषु गम्यमानधर्ममूलं सादृश्यमेव काव्यशोभातिशयं दीपयति । अलङ्काराणां शोभातिशययोग-महात्म्यात् गुणीभूतव्यंग्यविषयत्वम् ।

(दण्डिनः "काव्यशोभा" ध्वनिकारस्य "काव्यछाया" च तुल्ययोग-क्षेमे । कान्ति–छाया–छवि–शोभाशब्दानां शक्यतावच्छेदकस्यैक्यात्पर्या-यत्वम् । (अमर/३।३।१५८) उभाभ्यामपि, काव्यस्योत्कर्षः तच्छो-भायामेवेति स्वीकृतम् । उभयोरपि मते शोभापदस्य (१) चमत्कारार्थः, २)रसमयीभावानुभूतिः इत्यर्थद्वयमपेक्षितम् । इति ध्वनिकारानु-यायिनः ।)

स्वभावोक्तिवक्रोक्तिरूपाभ्याम् वाङ्मयस्य द्वैविध्यं भामहाभिमत-मपि मन्तव्यम् । यतो हि वक्रोक्तेरलङ्कारत्वेन स्वभावोक्तेश्चालङ्कार्यत्वेन परिगणनं कुन्तकाचार्येण कृतम् । अलङ्कारेषु वक्रोक्तेः प्राधान्यं सर्वसम्म-तम् । वक्रोक्त्यात्मवादस्य "अलङ्कारवादः" इत्यपि संज्ञाभिधातुं शक्यते । ध्वनिमतानुयायिनां रीत्या वैखरीवागपि परावाचः प्रतिबिम्बभावः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रसभावापन्नदशायास्तुरीयावस्थाकल्पत्वेन काव्यशब्दानामपि तुरीयार्थ-रूपरसादिदीपकत्वमेवायाति । तथा हि–

"काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा ।
क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः ॥"

अर्थादादिकवेर्महर्षेः प्राचेतसोवाल्मीकेर्निहतसहचरवियोगकातर-क्रौञ्च्याक्रन्दजनितः शोक एव रसतामापन्नः । सहचरहननोद्भूतसाहित्यवैधुर्योद्वेलितः शोकस्थायिभावो निरपेक्षभावत्वेन विप्रलम्भशृङ्गारोचितस्थायिविलक्षणे यथाविधालम्बनोद्दीपनोत्थक्रौञ्च्याक्रन्दाद्यनुभावचर्वणेन हृदयसंवादतन्मयीभवनक्रमेणास्वाद्यमानतामुपपन्नो लौकिकशोकातिरिक्तस्वचित्तद्रुतिसमास्वाद्यसारां करुणरसरूपतामापन्नपूर्णकुम्भोच्छलनन्यायेन चित्तवृत्तिनिःस्यन्दस्वभाववाग्विलापादिवच्च समयानपेक्षत्वेऽपि चित्तवृत्तिव्यञ्जकत्वात् "इति न्यायेन कृतकतयैवावेशवशात्समुचितशब्दछन्दोवृत्तादिनियन्त्रितश्लोकरूपतां प्राप्तः । स एवेष्टार्थः । तद्व्यवच्छिन्नापदावली काव्यशरीरम् । इष्टार्थव्यवच्छिन्ना पदावलीकाव्यशरीरमितिवदता दण्डिनापि शरीरातिरिक्तस्य कस्यचनार्थविशेषस्य सहृदयहृदयविश्रान्तेधामत्वेन सत्ता स्वीकृतैव । तस्य काव्यात्मत्वेनाभिमतार्थस्य दीपकाः गुणा अत एव कान्तिगुणं लक्षयन्नाह वामनाचार्यः–

दीप्तरसत्वं कान्तिः ३।२।१५

विभावानुभावव्यभिचारिभिरभिव्यक्तत्वमेव दीप्तत्वम् । गुणाः काव्यस्यचरमोत्कर्षाधायकाः काव्यार्थधर्माः । ते शब्दार्थमूलकाः वा आत्ममूलकाः वेति विचारान्तरम् । भरतदण्डिवामनाचार्यैः 'दशगुणाः' स्वीकृताः । माधुर्यौजःप्रसादाख्यगुणेष्वेव मम्मटाचार्येण वामनाभिमतानां गुणानामन्तर्भावउक्तः । रीति निरूपणमपि प्रथमतो दण्डिनैव कृत मार्ग शब्देन कृतम् । आनन्दवर्धनेन च सङ्घटनाशब्देन सैव रीतिरुक्ता । रीते रसादिदीपकत्वमपि ध्वनिकृता विमृष्टम् । रीतिरात्मा काव्यस्येति सूत्रसंघटनात्मशब्दार्थस्तुकरंकगात्रकल्पनावशात् वाक्यवैलक्षण्यप्रकटनप्रगल्भः कश्चन स्फुरत् हेतुस्वभावः । रीतेरात्मत्वमिव शब्दार्थयुगलस्य शरीरत्वमप्यौपचारिकम् । एवञ्च दण्डि–वामन–मम्मटप्रभृतीनां मते गुणानामा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्मधर्मत्वेन शब्दार्थधर्मत्वमौपचारिकम् । अत एव 'सगुणौ' इत्यस्य गुणाभिव्यञ्जकाविति मम्मटाचार्यसूत्रार्थो मन्तव्यः । अत एवाष्टमोल्लासे वामनमतखण्डनं संचिक्षेपविषयैवेत्याकलनीयम् । अलङ्कार-गुण-रीतीनां" काव्यार्थोत्कर्षाधायकत्वरूपधर्मैकत्वेनाभेदोऽपि सुवचः ।

काव्यार्थो द्विविधः व्यक्तः सूक्ष्मश्च । सूक्ष्मोऽपि द्विविधः भाव्यो वासनीयश्च । शीघ्रनिरूपणागम्यो भाव्यः । एकाग्रताप्रकर्षगम्यो वासनीयः । व्यक्तः वाच्यः, सूक्ष्मश्च प्रतीयमानः । तदुक्तम्-

योऽर्थः सहृदयश्लाघ्यः काव्यात्मेति व्यवस्थितः
वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ ॥

तावुभावपि सहृदयश्लाघ्यावर्थौ काव्यशरीरम् । उभयोः सूक्ष्मं कञ्चनान्यमेवार्थं काव्यात्मानमामनन्ति । तदप्युक्तम्-

प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्
यत्तत्प्रसिद्धावयवातिरिक्तं विभाति लावाण्यमिवांगनासु ॥

एवञ्च काव्यार्थो वस्त्वलङ्काररसादिभेदेन त्रिविध इति वदन्ति ।

वस्त्वलङ्काररसादीनां व्यंग्यत्वं व्यञ्जकत्वञ्चेति ध्वनिकृतामपि निर्णयः ।

दण्डिभामहवामनैः काव्यशरीरस्यैव प्राधान्येन विवेचनं कृतम् । काव्यात्मनो मीमांसायाः पीठिकापि तैरेव प्रस्तुतः । उभयोरपि समन्वयः कृतो भवति ।

"काव्यशोभाकरान् धर्मानलङ्कारान् प्रचक्षते ।
वक्राभिधेयशब्दोक्तिरिष्टावाचामलङ्कृतिः ॥"

काव्यसौन्दर्यमेवान्तर्वहिर्भेदेन विभज्यान्तः सौन्दर्यस्यैव काव्ये प्राधान्यम् तदाधारकमेव वाह्यसौन्दर्यमिति व्यवस्था ।

सूक्तेः काव्यचिन्तनमारभ्य भावस्य रसालङ्कारयोः, भाषायाश्च वक्रोक्तावेवपर्यवसानंभवतीति विज्ञायते । कलानां काव्याङ्गत्वमपि नैव विरुद्धम् । अत एव-

न स शब्दो न तद्वाच्यं न स न्यायो न सा कला ।
जायते यन्न नाचाङ्गमहोभारो महान् कवेः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नाटचमपि काव्यमेव, रसात्मकत्वात् । अत एव काव्याङ्गमिति पदमूर्ध्वोक्तकारिकायां निवेशयति भामहाचार्यः । भरताचार्येण सहृदयाह्लादकानां भावानां कविभावान्तर्भूतत्वमेवोक्तम् । तदुक्तं भरतमुनिना—"भावा इति कस्मात्? किं भवन्तीति भावाः, किं वा भावयन्तीति भावाः? भू इति करणे धातु, तथाच भावितं वासितं कृतमित्यनेकार्थान्तरम् । लोकेऽपि प्रसिद्धम् । अहोऽनेन गन्धेन रसेन वा सर्वमेव भावितमिति । तच्च व्याप्त्यर्थम् । अतः—

वागङ्गमुखरागेण सत्वेनाभिनयेन च
कवेरन्तर्गतं भावं भावयन्भाव उच्यते । (ना० शा० ७।२)

इत्थं काव्यनाटचाभ्यां सहृदयास्वाद्यमेव भावाभिव्यक्ति भरतः समर्थयते । सहृदयभावमूलं कवेः भाव एव काव्यसृष्टिमूलम् । स एव रसमीमांसास्थायि-संचारि-विभावादिकानां अलङ्कारभावनायामपि मूलम् । कवेर्मनोगतो भावएव, मनःसंवेगः हृदि मूर्तामूर्तरूपप्रतिबिम्बगृहीतैर्जनोद्वेगस्मृतिकल्पनादिनोद्‌बुध्दमनोदशादिशब्दैराचार्या व्यपदिशन्ति ।

रससाधारणीकरणमूलं भाव एवास्ति । भाव एव भावना । अत एव चमत्कारजनकभावनाविषयार्थप्रतिपादकः शब्दः काव्यमित्युक्तं पण्डितराजेन । कवेर्भाव एव सहृदयवासनामुद्वेलयति । काव्येषु यत्र रसवस्त्वलङ्कारादीनामविषयत्वं तत्र काव्यत्वं न सम्भवति । यस्मादवस्तुसंस्पर्शिता काव्यस्य नोपपद्यते, पिपीलिकादिब्रह्मान्तं सर्वमेव नैतद्‌गतमवश्यमेव कस्यचिद्रसस्य भावस्य वा विभावत्वेनाङ्गतामासादयति । चित्तवृत्तिविशेषा एव रसादयः । न च तदस्ति वस्तु किंचिद्यन्न चित्तवृत्तिविशेषमुपजनयति । तदनुत्पादने वा तस्य कविविषयत्वाभावः । न च तादृशोऽस्तिकाव्य प्रकारो यत्र रसादीनां प्रतीतिर्न भवति । परन्तु तत्र रसभावादिविवक्षाशून्यशब्दार्थालङ्कारोपनिबन्धनं तदपेक्षया रसभावादिशून्यत्वमेवार्थस्य प्रकल्प्यते । कविविवक्षोपारूढ एव काव्ये शब्दानामर्थः । वाच्यसामर्थ्यवशेन कविविवक्षाविरहादपि एवं विधस्थले भवन्त्यपि रसादिप्रतीतिदुर्बला भवतीत्यनेन प्रकारेण नीरसत्वं परिकल्प्य चित्रत्वं व्यवस्थाप्यते तदुक्तम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रसभावादिविरहे विवक्षाविषये सति ।
अलङ्कारनिबन्धो यः स चित्रविषयो मतः ।

यमकानुप्रासगुणवक्रोक्तिरीतिकृतभाषागतशब्दसौष्ठवभूमौ काव्यप्रतिष्ठितं भवति । भावमूलककाव्यप्रतिष्ठायाः सिद्धान्तास्तु रसालङ्कारध्वनिपृष्ठपातिनः ।

सूक्तेरलङ्कारपर्यायित्वमपि द्रष्टव्यम् । "काते अस्त्यलङ्कृतिः 'सूक्त" इति । सौशब्द्यभूतानुप्रासयमकयोरचमत्कारजनकत्वं यद्यप्यङ्गीकृतमेव तथापि न तयोरेव प्राधान्यम् । दण्डिमतानुसारेणानुप्रासस्य माधुर्यगुणेऽन्तर्भावः । यमकस्य चित्रकाव्यत्वेनाङ्गीकारः । दण्डिभामहाभ्यामुभाभ्यामपि रसादीनामलङ्कारान्तर्भुक्तत्वेन रसवदाद्यलङ्कारतया काव्यशरीरशोभाधायकत्वेन रसादीनामपि स्थितिः । प्राधान्ये रसादीनां अलङ्कार्यत्वमन्यथालङ्कारत्वमेवेति ध्वनिकृतापि व्यवस्थापितम् ।

कविविवक्षाद्विविधा – शब्दस्वरूपप्रचिकाशयिषा, शब्देनार्थप्रचिकाशयिषा च । शब्दस्वरूपप्रचिकाशयिषा न शाब्दव्यवहाराऽङ्गम् । प्राणिमात्रप्रतिपत्तिफलत्वात् । शब्देनार्थप्रचिकाशयिषित्वात्तु शब्दविशेषावधारणावसितव्यवहितापि शब्दकरणव्यवहारनिबन्धम् । तयोरुभयोरनुमेयत्वम् प्रतिपाद्योऽर्थस्तु प्रयोक्तुरर्थप्रतिपादनसमीहाविषयीकृतः । स एव कविविवक्षाविषयीभूतोऽस्ति । सोऽर्थोऽपि द्विविधः वाच्यो व्यङ्ग्यश्च । वस्त्वलङ्काररूपोऽर्थस्तु वाच्योऽप्यस्ति । व्यङ्ग्योऽप्यस्ति । रसादिरर्थस्तु स्वप्नेऽपि न वाच्यः । तदुक्तम् ।

वाच्यवाचकचारुत्वहेतूनां विविधात्मनाम् ।
रसादिपरता यत्र स ध्वने र्विषयोमतः ॥

अर्थात् रसभावतदाभासतत्प्रशमलक्षणं मुख्यमर्थमनुवर्तमाना यत्र शब्दार्थालङ्कारगुणाः परस्परं ध्वन्यपेक्षया विभिन्नरूपा व्यवस्थितास्तत्र काव्येध्वनिरिति व्यपदेशः । यस्मिन्काव्येऽप्रधानतया रसादयोरलङ्कारतांगतास्तेरसाद्यलङ्कारविषयाः । प्राचीनैर्गुरुदेवनृपतिपुत्रविषयिण्यारतेः प्रेयोऽलङ्कारत्वमुक्तम् । यदभ्युपगतं ध्वनिकृता–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गंतु रसादयः ।
काव्ये तस्मिन्नलङ्कारो रसादिरिति मे मतिः ।।

इति वदता । अलङ्कारस्तु चारुत्वहेतुः । अलङ्कार एव काव्यात्मेति पक्षेऽलङ्कार एवालङ्कारस्य चारुत्वहेतुरित्याशयः । तस्मादलङ्कारात्पृथगलङ्कार्येण केनचन भवितव्यमेव । व्यंग्यार्थाभिव्यञ्जनसामर्थ्याधानमेवालङ्करणम्, नान्यत्किञ्चित् । (अतः ध्वनिवादिनां मते ध्वन्यात्मैवालङ्कार्यः । रसात्मवादिनां मते रस एव मुख्यवाक्यार्थत्वेनालङ्कार्यः । ध्वनेरात्मा रसः । तस्माद्रसस्यैव काव्यात्मत्वेन तस्यैवालङ्कार्यत्वम्) । तदुच्यते–

रसभावादितात्पर्यमाश्रित्य विनिवेशनम् ।
अलंकृतीनां सर्वासामलङ्कारत्वसाधनम् ।।

तस्माद्रस एव काव्यात्मेति सिद्धान्तः । गुणानां रसधर्मत्वेन, रीत्यलङ्काराणामन्येषामपि चिरन्तनाचार्योक्तकाव्यजीवितभूतानां तत्त्वानां रसाभिव्यक्तौ सहयोगित्वेन व्यञ्जकत्वमेव । गुणालङ्काररीतिवृत्तिवक्रोक्त्यादीनां रसाभिव्यंजकत्वेन वाच्यत्वादेव वाच्य-प्रतीयमानभेदाभ्यां काव्यात्मभूतस्यार्थस्य द्वैविध्यमुक्त्वा–

तत्र वाच्यः प्रसिद्धो यः प्रकारैरुपमादिभिः ।
बहुधाव्याकृतः सोऽन्यैः काव्यलक्ष्मविधायिभिः ।।

इति दण्डिभामह-वामनादीनां वाच्यार्थनिरूपणं प्रायशोऽङ्गीकृत्यैव प्रतीयमानार्थस्य प्रतिष्ठा कृता । काव्यशोभायाः कर्तारो धर्माःगुणाः, तदतिशयहेतवोऽलङ्काराः, तदात्मारसश्चेति सर्वं स्वीकृत्यैव "काव्यस्यात्मा ध्वनिः" स च वस्त्वलङ्काररसादिनात्रिविधः । तत्रापि वस्त्वलङ्कारध्वनी सर्वथारसं प्रतिपर्यवस्येते । रसादीनां प्राधान्ये ध्वनित्वं गुणीभावेत्वलङ्कारत्वमिति विवेकः । निरपेक्षप्राधान्यमङ्गीत्वम् ।

३. रसात्मवादः (भरतः)

"काव्यस्यात्माध्वनिः" इति प्रतिज्ञासूत्रे आत्मपदं तथैव लाक्षणिकं यथा "रीतिरात्माकाव्यस्य" इति सूत्रे, तत्प्रागेवावोचम् । रसात्म-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वादस्य श्रौतं स्मार्त्त–पौराणिकमौपनिषत्कञ्चस्वरूपं विस्तरेणान्ते दण्डिना गुणालङ्काररीतिनां समाजः सम्बन्धो व्यवस्थापितः। तन्मते मार्गापरपर्यायारीतेः काव्यत्वाधायकता प्राधान्येनास्ति। अत एव तदुत्तरभवेन वामनेन रीतिरात्मा काव्यस्येत्यसूत्रि। परन्तु रीतिगुणयोरा श्रयाश्रयीभावो वामनेन व्यवस्थापितः। अलङ्काररीत्ययोश्चानित्य-सम्बन्धस्तन्मते।

काव्ये रसस्य प्राधान्यं पूर्वत एव प्रतिष्ठितमासीत्। अग्निपुराणे व्यासेनापितथैव प्रतिपादितत्वात्। परन्तु दण्डिभामह-वामनोद्भटादिभि-रलङ्कारपक्षनिक्षिप्ततैव प्रतिपादिता। आनन्दवर्धनात्प्राग्भूतैराचार्यैर-सादीनामलङ्कारत्वेनैव परिगणना कृता यद्यपि "रसभावनिरन्तरम्" "रतिः शृङ्गारतां गता" इत्यादिना काव्ये रसस्यापरिहार्यत्वं दण्डिनाप्यु-क्तम्, वामनेन कान्तिगुणान्तर्भूतत्वेन रसादीनां स्वरूपं व्यवस्थाप्य रसानां काव्यात्मधर्मतापि, प्रतिपादितैव, उद्भटेन च रसा अलङ्कारात्पृथगुक्ताः तत्पक्षानुसारेण अलङ्काररीतिरसध्वनीनां सिद्धान्ता समन्वयाय प्रयासो-प्याकलनीयः तथापि काव्यस्यात्मा रस इति कण्ठरवेनोक्तम्। भामहा-चार्येण स्फोटवादस्य खण्डनं कृतमेव। स्फोटानङ्गीकारे ध्वन्यनङ्गीकार-स्यार्थस्यसिद्धिः।

केषाञ्चिन्मतानुसारेण भर्तृहरिभामहयोस्तुल्यकालिकत्वमपि सम्भ-वति। नीतिशतककृद्भिन्नेन वाक्यपदीयकृता भर्तृहरिणा स्फोटसिद्धान्त-स्य समर्थनं कृतम्। ततस्तन्मतानुसारिणा आनन्दवर्धनाचार्येणापि– "प्रथमे हि विद्वांसो वैयाकरणाः। ते च श्रूयमाणेषु वर्णेषु ध्वनिरिति व्यवहरन्ति।" ततस्तन्मतानुसारिभिरस्माभिरपि न्यग्भावितवाच्यवाच-कव्यंग्यव्यंजनक्षमस्य शब्दार्थयुगलस्य ध्वनिरिति व्यवहारः कृत इति काव्यप्रकाशकाराः। तेन वस्त्वलङ्काररसादिस्त्रिरूपोध्वनि काव्यात्मेति काव्यप्रकाशे निर्णीतम्।

साहित्यदर्पणकृता विश्वनाथेन वाक्यं रसात्मकं काव्यमिति प्रति-ज्ञाय "काव्यस्यात्मा ध्वनिः" इति प्रतिज्ञासूत्रस्य द्वितीयकारिकोक्तार्थेन विरोधमुद्भाव्य त्रिरूपध्वनेः काव्यात्मत्वे प्रहेलिकादावतिव्याप्तिमतिदि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शता "रसादीनामसंलक्ष्यक्रमध्वनीनां वाच्यसामर्थ्याक्षिप्तत्वमेव प्रतिपाद्य काव्यस्य रसात्मकता स्थापिता । पण्डिराजेनापि ध्वनेरात्मनो रसस्य सहृदयहृदयाह्लादजनकत्वेन रमणीयार्थत्वमुपपाद्य रत्याद्यवच्छिन्नभग्नावरणायाश्चितेरेव रसरूपत्वमिति परिष्कार्य रसात्मवादस्य ध्वनिसिद्धान्तपृष्ठभूमावेव दृढतरी स्थापना कृता । रसस्य काव्यात्मत्वे सिद्धे तदानुगुण्येनैवालङ्कारादीनां विनिवेशननियमा आनन्दवर्धनेन निर्धारिताः ।

रसालङ्कारयोरन्तरमपि ध्वन्यालोके-तद्व्याख्यायां लोचने च विस्तरेण प्रकटितम् । दण्डिभामहोद्भटादिरीत्या रसादीनामलङ्कारेषु भाक्तत्वमेवातस्ते भाक्तवादिनः ।

रसादिरर्थो, वाच्यो वा नुमेयो वा, उत्पाद्यो वा, भाव्यो वा पोष्यो वा व्यङ्ग्यो वेति सन्त्यत्रवादिनां विप्रतिपत्तयः । कैश्चित्स तात्पर्यार्थोऽपि कथ्यते । तदेतत्सर्वमेव नव्यसाहित्यशास्त्रस्य विषयः । इत्त्थं साहित्यशास्त्रे रसात्मवाद एव सिद्धान्तः । अलङ्कारात्मवादस्तु पक्षः ।

काव्येषु दोषनिराचिकीर्षया भाभहाचार्येण न्यायाः सम्प्रसाधिताः । नव्यसाहित्यशास्त्राचार्यैः दार्शनिकरीत्या रसादेरर्थस्य निरूपणे मीमांसान्यायानामप्युपयोगः कृतः । अलङ्कारेषु न्यायानामपि चमत्कारबीजत्वं रुद्रटेन सर्वतः प्राथमेस्येनाङ्गीकृतम् । विशेषतः आनन्दवर्धनाभिनवगुप्त-मम्मटैर्मीमांसान्यायैः काव्यपदार्थाः परिष्कृताः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

काव्यकलेवरविचारः

शब्दार्थशरीरं तावत्काव्यम् । शब्दगताश्चारुत्वहेतवोऽनुप्रासादयः आर्थाश्चोपमादयः, रसधर्माः गुणाः, तदनतिरिक्तवृत्तयोऽपि उपनागरिकाद्याः, रीतयश्च वैदर्भीप्रभृतयः । शब्दानां स्वरुपमात्रकृतं चारुत्वं शब्दालङ्कारेभ्यः, संघटनाश्रितत्वं तु शब्दगुणेभ्यः । एवमर्थानां चारुत्वं स्वरूपमात्रनिष्ठमुपमाविषयः, संघटनापर्यवसितञ्चार्थगुणेभ्यः । यद् गुणालङ्कारव्यतिरिक्तं न तच्चारुत्वकारि । अचारुत्वस्य दूषकताबीजत्वेन चमत्कारप्रतीतिप्रतिबन्धकत्वात् ।

वक्तीतिवाक्शब्दः । उच्यतेऽनयेति सम्बन्धः, उच्यतेऽनयेतिवागभिधाव्यापारः तत्र शब्दार्थवैचित्र्यप्रकारोऽनंतः, अभिधावैचित्र्यप्रकारोऽनन्त एवङ्गुणालङ्काररीतिप्रभृतीनांरसभावादीनाञ्च सौन्दर्यसाधकत्वेनेष्टार्थदीपकत्वे साधनत्वेनालङ्कारत्वात्परिशेषादर्थविशेषप्रत्यायकः शब्दः शब्दविशेषप्रत्याय्यश्चार्थविशेषः, शब्दार्थौ वा काव्यशरीरम् ।

काव्य–सौन्दर्यसाधनानांगुणालङ्काररीतिप्रभृतीनां शब्दार्थमूलकत्वेनाखिलानामपि तेषामन्वयव्यतिरेकाभ्यामाश्रयाश्रयिभावाभ्यां निर्णयं विधाय शब्दार्थचारुत्वाधायकतत्त्वानां पृथग्रूपत्वं प्रकल्प्य तेषां सर्वेषामपि परस्परोत्कर्षजनकत्वेन शब्दार्थयोः साहित्यमेव काव्यमिति भामहादयः । शब्दार्थौ सहितौ काव्यमिति वचनात् । शब्दार्थयोः "साहित्यमित्यस्य तयोः सगुणत्वंसालङ्कारत्वं दोषाभाववत्वञ्चार्थः । दोषहीनगुणोपादानालङ्कारसंयोगरसादियोगः साहित्यम् ।

ननु भोजराजादीनां मते द्वादशविधं साहित्यम् अत्र चतुः प्रकार-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कत्वमेवेतिकथमिति चेन्न, रुय्यकादिभिरष्टानां साहित्यसाधारण्याङ्गीकृतत्वात् चतुर्णामेव काव्यार्थदीपकत्वेनाभिमतत्वादतएवाद्यानामष्टानां सम्बन्धरूपता। अवशिष्टानाञ्च परिष्कारररूपतेति सिद्धान्तितम्। कविविवक्षोपारूढानां शब्दनां, तद्विवक्षा विषयीभूतार्थैस्सह सम्बन्धस्यैव साहित्यपदार्थत्वात् ।

ननु साहित्याभिधानं निर्मूलमश्रुतपूर्वत्वादप्रयुक्तत्वाच्चेति चेदत्रोच्यते– "विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः अत्र संयोग–पदस्य सम्मुग्धभाषया संयोगसामान्याभिधायित्वे, सहृदयहृदयाह्लाद–जननानर्हत्वात्कविकर्मवहिर्भावापत्तेः काव्यार्थनिष्पादनाक्षम वात्। "परस्परोकर्षजनकत्वे सति शोभाजनकत्वमेव संयोगपदार्थतया गृह्यते। इदमेव साहित्यपदेनाभिहितम्। कविकुलगुरुः तदेव शब्दार्थवैचित्र्यं कविसृष्टेरुपादानं काव्यशोभारहस्यमूलं सकलसत्कविकाव्योपनिषद्भूतं च तत्त्वं माधुर्यसारसर्वस्वपरमानन्दरूपपार्वतीपरमेश्वरप्रणामव्याजेन कटाक्षयति–

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ।।

तस्मात् शब्दार्थयोः काव्यशरीरत्वेनालङ्कार्यत्वाद् गुणालङ्काररसादीनां च तदलंकृतिसाधनत्वेनालङ्कारत्वमिति प्राचां सिद्धान्तः।

शब्दार्थशरीरं काव्यमिति यदुक्तं तत्र शरीरग्रहणादेव केनचित्तदनुप्राणकेनात्मना भवितव्यम्। शब्दस्तु शरीरभाग एव, सर्वजनसम्वेद्यत्वेन स्थूलोऽयं कृशोऽयमिति वा सन्निविशते। अर्थः पुनः सर्वसंवेद्यो न भवति। न चार्थमात्रेणैव काव्यव्यपदेशः, लौकिकवैदिकवाक्येषु तदभावात्। नवाशब्दमात्रेणैव काव्यत्वं निर्वहति। शब्दार्थयोरुभयोरपिकाव्यशरीरत्वेनाभ्युपगतत्वात्। अत एव शब्दार्थौ सहितौ काव्यमिति भामहाचार्याः। सहिताविति शब्दायत्तं हि साहित्यमिति पी. वी काणे प्रभृतयो वदन्ति–भामहमते कायशरीरं तु–

"शब्दश्छन्दोऽभिधानार्था इतिहासाश्रयाः कथाः,
लोको युक्तिः कलाश्चेति मन्तव्या काव्यागैर्ह्यमी" ।। इति।

"शरीरं तावदिष्टार्थव्यवच्छिन्नापदावली" इति च दण्डिनः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कविसमभिप्रेतार्थस्य वाच्यत्वम्, काव्यस्य च तदर्थविभावकतया वाचकत्वम्। वाच्यवाचकभावश्चाभिधाव्यापारः। वाच्यवाचकभावातिरिक्तस्य सम्बन्धस्य गौणत्वेन वाच्यातिरिक्तस्यार्थस्य गौणत्वाद् वाच्यार्थस्यैव मुख्यत्वेन काव्यार्थत्वाङ्गीकारात्तद्बोधिकायाश्शक्तेरभिधाइतिव्यपदेशः। वक्रोक्तेरलङ्कारजीवितत्वं नव्या अपि स्वीकुर्वन्ति। काव्यशरीरमीमांसकानां मते गुणालङ्कारयोर्विभाग औपचारिकः। रीतेर्गुणाश्रयत्वम्। एवञ्च वाच्यार्थस्य काव्ये मुख्यत्वेन तच्छरीरभूतशब्दार्थयोरलङ्कार्यत्वम्। वाच्यार्थएव काव्यार्थः। तच्छोभाकरा एव गुणालङ्कारादयः।

वाच्यार्थोऽपि मुख्यो गौणश्चेतिद्विविधः। वाच्यार्थस्योपस्कार्यत्वं गौणस्य चोपस्कारकत्वमप्यामनन्ति। यत्र वाच्यं वर्णनीयतया विवक्षितं सदनुपपद्यमानमुपपादकतया स्वस्य शोभाजनकतया वा परमाक्षिपति तत्र "स्वसिद्धये पराक्षेपः", इति न्यायेन वस्तुमात्रं गम्यमानं वाच्योपस्कारत्वेनावभासते। यत्र पुनरप्राकरणिकत्वेनाविवक्षितं तत्र "परार्थे स्वसमर्पणम्" इति न्यायेनान्यस्मै प्राकरणिकाय स्वात्मानमर्पयति। प्राकरणिकोऽर्थो–वाच्योऽप्राकरणिकश्चार्थो गौणः। रुद्रटेनापि प्रतीयमानं वस्त्वलङ्कारत्वेन स्वीकृतम्। तन्मते, भावालङ्कारस्यैव द्वौभेदौ। रूपकदीकादावुपमालङ्कारो वाच्यार्थोपस्कारत्वेनोक्तः। रसवत्प्रेय उजस्वित् प्रभृतयस्तु रसभावादिर्वाच्यशोभाहेतुत्वेनोक्ताः। उत्प्रेक्षा "प्रतीयमाना" कथिता। तदित्थं वस्त्वलङ्काररसादीनां त्रयाणामपि प्रतीयमानानामलङ्कारत्वं रुद्रटेनाप्याम्नातम्।

वामनेन सादृश्यनिबन्धनायाः लक्षणायाः वक्रोक्त्यलङ्कारत्वं ब्रुवता कश्चिद् ध्वनिभेदोऽपि स्वीकृतः। केवलं गुणविशिष्टपदरचानात्मिका रीतिरेव काव्यात्मा। उद्भटादिभिस्तु गुणालङ्कारयोः शोभाहेतुत्वा विशेषात्तूभयोः साम्यमेवोक्तम् विषयमात्रेणैव भेदप्रतिपादनात्संघटनाधर्मत्वे नेष्टेश्च, तदित्यलङ्काराः एव काव्ये प्रधानम् इति प्राचां सिद्धान्तसंक्षेपः।

भामहाचार्यमतानुसारिणा कुन्तकाचार्येण वैदग्ध्यभङ्गीभणिति स्वभावानेकप्रकारावक्रोक्तिरेव प्राधान्येन काव्यजीवितम्। अलङ्कारमूलभू-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ताया तस्याकाव्यार्थविभावकतयाऽभ्यर्हितत्वमपि भरतसम्मतत्वमेव । कुन्तकाचार्यरीत्यापि शब्दार्थौ पृथगवस्थितौ न केनाप्यलङ्कारेण योज्येते, परन्तु वक्रतया वैचित्र्ययोगितयाचाभिधानमात्रमेवानयोरलङ्कारः । तस्यैव शोभातिशयकारित्वात् । अभिधानं न लोकप्रसिद्धम्, तथात्वेऽकाव्यत्वापत्तेः । तस्मादलङ्कारणां परमरहस्यभूतावक्रोक्तिरेव काव्यस्य जीवितम् । तदुक्तम्–

"उभावेतावलङ्कार्यौ तयोः पुनरलङ्कृतिः ।
वक्रोक्तिरेव वैदग्ध्यभङ्गीभणितिरुच्यते ।।
शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि ।
बन्धे व्यवस्थितौ काव्य, तद्विदाह्लादकारिणि ।।"

शास्त्रादिप्रसिद्धशब्दार्थोपनिबन्धनव्यतिरेकिवर्णन्यासविदपूर्वार्थ प्रत्ययवाक्यप्रकरणबन्धात्मकः षड्विधविषयवक्रताविशिष्टः क्रम एव "वक्रकवि व्यापार;" । तथा च–

"वाक्यस्य वक्रभावोऽन्यो भिद्यते यः सहस्रधा ।
यत्रालङ्कारवर्गोऽयं सर्वोऽप्यन्तर्भविष्यति" ।।

इति बदता तस्यालङ्कारात्मत्वेन काव्ये प्राधान्यमित्युक्तम् सा च वक्रोक्तिः काव्यस्य विचित्राभिधा ।

दण्डिभामहाभ्यां रसानां भवानामलङ्कारपक्षनिक्षिप्तत्वमुक्तम् । दण्डिना तु सन्ध्यङ्गवृत्त्यङ्गप्रभृतीनामप्यलङ्काररूपत्वमुक्तम् । अनुप्रासादीनां शब्दचारुत्वहेतूनां मार्ग (रीतिं) गुणानामैक्यमप्युक्तम् । (का० द० १।५४) पुनरग्रे गुणानुप्रासयोः रीतिशोभाधायकत्वमेवोक्तम् (२।३) । भामहेनापि ओजःप्रसादमाधुर्यानां गुणत्वेनाभिधानं न कृतम् । प्रत्युत तेषामपि शब्दालङ्कारप्रकरणे प्रवचनं कृतम् । परन्तु परकीयरीत्या तेषां गुणत्वं न भामहोक्तरीत्येति तत्प्रसङ्गपर्यालोचनेन स्फुटीभवति तेषामलङ्कारत्वेति प्रतिभाति । अत एव भामहदण्डिरीत्यापि गुणालङ्कारयोर्भेदकं किमपि तत्त्वं नैव मुखरीभवतीत्याकलनीयम् । एवं प्राचां रीत्या गुणालङ्कारयोर्भेद एव सिद्धयति । रीतिगुणयोरप्यभेदो द्रष्टव्यः ।

आनन्दवर्धनाचार्य रीत्या वक्रोक्तिरतिशयोक्त्योरभेदः । अलङ्काराणां मूलसादृश्यं वक्रोक्तिरतिशयोक्तिरित्यादीनां विश्लेषणानि साहित्यसम्प्रदा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यस्य प्राचीने युगे सञ्जातानि । स्वभावोक्तेरलङ्कार्यत्वालङ्कारत्वेमतभेदोऽस्ति । कुन्तकाचार्यस्तु स्वभावोक्तेरलङ्कार्यत्वमेवांगीकुरुते । परन्तु रुद्रटादीनां नीत्या स्वभावोक्तेरलङ्कारत्वमप्युपपन्नम् । एवमलङ्कारवादिनामपि अलङ्कारात्पृथगलङ्कार्यतत्त्वान्वेषप्रवृत्तय: प्रतिपदमक्षिलक्ष्यीभवन्ति । परन्तु काव्यशरीरभूतयो: शब्दार्थयो:, अर्थविशेषविशिष्टस्य शब्दस्य, शब्दविशेषप्रतिपाद्यस्य चार्थस्यालङ्कार्यत्वाङ्गीकरणात्सालङ्कारस्य काव्यतेति न्याय: सिद्ध एव ।

१. प्राधान्यविचार:

काव्ये प्राधान्यं कस्येति प्रश्नेऽलङ्कारवादानुसारेणाप्यन्वयव्यतिरेकयोरेव नियामकत्वमभ्युपगन्तव्यम् । आश्रयाश्रयिभावोऽपि नियमहेतु: । औचित्यं सर्ववादिसम्मतं काव्यशोभानियामकं तत्त्वमस्ति । काव्यस्य सौन्दर्यमेव मूलं तदेव "सौन्दर्यमलङ्कार:" इति न्यायनिर्णीत-सिद्धान्त: । उपमादिष्वस्यालङ्कारपदस्य लाक्षणिकत्वमेव । "हितं मनोहारि च दुर्लभं वच:" इत्यत्र हितपदं कमर्थं कटाक्षयति ? इतोऽधिकं "साहित्य" विश्लेषणप्रसंगे व्यक्तीभविष्यति । कान्तासम्मितोपदेशविधायकं वच: काव्यं तच्च प्रविरलविषयमेवेत्यानन्दवर्धनाचार्या: । नाटकानां काव्यानाञ्चेतिहासपुराणादिन्येवस्रोतांसीति काव्यानीतिहासान्येव । "इतिहासोत्तमादस्माज्जायन्ते कविबुद्धय" इति महाभारते प्रतिज्ञानात् । बाल्मीकिरामायणेऽपि–

"काव्यं रामायणं प्रोक्तं सीतायाश्चरितं महत् इत्युक्तम् "महत् काव्यं महाकाव्यम्" तस्य फलोक्तिरपि–

"पठन् द्विजो वाग्वृषभत्वमीप्यात्
स्यात् क्षत्रिय: क्षत्रपतित्वमीयात्
वणिग्जन: पण्यफलत्वमीयात्
शृण्वञ्श्च शूद्रोऽपि महत्त्वमीयात्"

इति, तदनुसारेणैव भगवता व्यासेनापि विष्णुपुराणे–

"काव्यालापाश्च ये केचिद्गीतकान्यखिलानि च,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शब्दमूर्तिधरस्यैते विष्णोरंशाः महात्मनः । इति
प्रोक्तम् । तेनैवाग्निपुराणेऽपि–
"ध्वनिर्वर्णाः पदं वाक्यमित्येतद्वाङ्मयं मतम् ।
शास्त्रे शब्दप्रधानत्वमितिहासेऽर्थनिष्ठता ।।

अभिधैव कुन्तकाचार्यस्य वक्रोक्तिव्यापारः । "विचित्रैवाभिधावक्रोक्तिः" इति कुन्तकोक्तेः । "सादृश्याल्लक्षणावक्रोक्तिः" इति वामनाचार्यः । अत एव तद्रीत्या वक्रोक्तेर्गौणत्वं रीतेः प्राधान्यं भवति । रीतावपि वैशिष्ट्यं गुणकृतमेवेति गुणाः पदसंघटनधर्माः । शिष्टं गुणनिरूपणे । रसानामपि गुणेऽन्तर्भावः । एवमभिधालक्षणयोरपि संकेतोऽस्ति । एवं तन्मते विचित्रैव लक्षणा वक्रोक्तिरित्यायातम् । यथा तथा वा अस्तु, काव्यशब्देषु व्यापारस्य प्राधान्यमित्येव तत्त्वं सहृदयहृदयाह्लादजननानुकूलो कविव्यापारः अतः काव्ये "कविव्यापारस्यैव प्राधान्यमित्येव मदीयापि प्रतिपत्तिः । तथैव "अभिधा" अभिधाविशेषः (वक्रोक्तिः) लक्षणाविशेषः (वामन) इति नाम भवतु नामान्तरकरणे कियदिदं पाण्डित्यम् काव्यमपि वेदपुराणादिवद्विशिष्टार्थवच्छब्दस्वरूपम् । काव्यपदानां काव्यार्थबोधेकरणत्वम् । ज्ञायमानानां, ज्ञातानां वा काव्यशब्दलक्षणानां त्रयो व्यापाराः, अभिधानं, गुणवृत्तिर्व्यापारश्च । अभिधानमभिधेव । गुणवृत्तिः, शब्दस्योपचारितावृत्तिः । भामहादीनां मते, लक्षणागुणवृत्त्योरभेदोऽवश्यमाकलनीयः । व्यापारपदेन किमभिप्रेतं भामहस्येति बिमर्शनीयम् । अग्निपुराणरीत्या कविव्यापारोऽभिधैव । लक्षणावृत्तिजन्यबोधविषयीभूतस्यार्थस्याभिधेयापेक्षया गौणत्वेन, शाब्दस्येवार्थस्य काव्ये मुख्यत्वम् । अप्रधानभावः शाब्दो वा आर्थोवेत्यपि मार्मिकाः विमृशन्तु । काव्यनये यदा प्रधानाभावः शाब्दस्तदाऽप्रधानभाव आर्थः । अप्रधानभावस्य शाब्दत्वेऽर्थो गौणः । एवं गुणाप्रधानभावे चमत्कारमेव नियामकं तत्त्वमामनन्ति । काव्यचमत्कारश्च रसादिकृतोऽलङ्कारकृतोवेति प्रदीपे गोविन्द ठक्कुरः । "यत्र यन्मुखेन चमत्कारस्तत्र तन्मुखेन व्यवहारः इति नियमाच्च । "रसेसारश्चमत्कारः" इति न्यायात्काव्ये रसालङ्कारादीनां चमत्कारजपकभावनाविषयार्थाभिव्यञ्जकत्वेनेवाङ्गीकारादिति सिद्धान्तः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

"मुख्यस्य व्यञ्जकत्वे तदन्यस्य सहकारिता" इत्यानन्दवर्धनोक्तः सम्मिश्र-पदार्थः । तदेव साहित्यम् । काव्ये विशिष्टशब्दस्य विशेषार्थप्रतिपादकत्वम् । वाच्यवाचकयोरपि विशेषरूपत्वे न सहृदयस्वाद्यत्वम् । "प्रधानाप्रधानयोः प्रधानेकार्यसम्प्रत्ययः इति न्यायात् "प्राधान्येन व्यपदेशाः भवन्ती" ति न्यायाच्च काव्ये "रसएवात्रजीवितम् इति न्यायेन रसस्यैव प्राधान्ये सिद्धे तन्मुखेनैव, चमत्कारत्वेन तदीयान्वयव्यतिरेकानुविधायित्वमेव व्यवहारनियामकम् । अलङ्कारेष्वेव रसानामन्तर्भावादलङ्कारवादिनां मते रसत्वालङ्कारत्वयोर्व्याप्तिर्नियमसिद्धा । एवं वाच्यार्थस्य प्राधान्यं प्रतीयमानस्य च वाच्यार्थोपकारकत्वे सति वस्तुविशेषत्वं सिद्ध्यति । प्रतीयमानार्थस्याक्षिप्तत्वेन गौणत्वादित्यालङ्कारिकाणां सिद्धान्तः । वाच्यार्थस्य शोभाकारित्वमेवालङ्कृतित्वमिति स्पष्टमात् ।

"पाठक्रमादर्थक्रमोबलीयान्" इति न्यायादार्थी प्रतीतिरेव प्राधानम् । गुणप्रधानभावः शाब्द एवेति रसगङ्गाधरकारः । तथा च गुणप्रधानभावावच्छिन्नसहार्थसम्बन्धः सहोक्तिः" । तदुदाहरणे–

पद्मपत्रैर्नृणां नेत्रैः सहलोकत्रयश्रिया ।
उन्मीलन्तो निमीलन्तो जयन्ति सवितुः कराः ।।

"अत्रोन्मीलननिमीलनयोः पद्मपत्राद्याश्रयेन भिन्नयोरपि प्रकटत्वाप्रकटत्वाद्येकोपाध्यवच्छिन्नतयाऽभिन्नीकृतयोरुपादानादेकक्रियान्वयित्वेन सहोक्त्यलङ्कारत्वम् । अत्र गुणप्रधानभावःसहयोगेतृतियाप्रयुक्तः । "वर्षन्त्युन्मीलन्त्यो" इत्युदाहरणत्वेकेनापरस्य निगरणाभावान्नास्त्यतिशयस्य गन्धोऽपि । "एवं च निगीर्याध्यवसानरूपातिशयोक्तिरिति नागेशोक्तमपास्तम् । तथा हि– सूर्यकिरणानामुन्मीलने वियतिसंकोचविकासरूपे, पद्मपत्रादीनां तु विकास सम्पुटीभावे । अत उभे मिथो भिन्ने एव । तथापि तत्र शब्दोपात्ताभ्यामुन्मीलन–निमीलनाभ्यामेकोपाध्यवच्छिन्नतया पद्मपत्राद्युन्मीलन-निमीलने अप्यभेदेनाध्यवसिते । तस्मात् केवलाध्यवसायात्मकातिशयोक्तिगर्भितसहोक्तिः । श्लेषाभावाच्च न केवलामेवाध्यवसानव्यपदेशः । "यावता आर्थः क्रियाद्यन्वयितारूपः, पदार्थान्तररूपो वा, अप्रधान भावस्तावता आर्थ एव न तु शाब्दः । क्रियादिभिरन्वये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विशेष्यत्वेन विशेषताख्य विषयतयाखण्डा प्रधानता, पदार्थान्तररूपा वा अखण्डा सा । उभयथाप्यर्थगम्यत्वेनाप्रधानभावआर्थ एव । अस्ति तावद् अखण्डं सखण्डं वा प्रधानत्वम्, यद्दर्शनाद्यस्मिन्नगरे ग्रामे वा प्रधानं मुख्यो वेत्याद्यानरं व्यवहारोल्लासः । तदभावरूपे च प्रधानत्वे "सहयुक्ते-ऽप्रधाने" इति शासनेन तृतीयायाः शक्तेर्बोधेन तस्य कथमनर्थत्वम् न च सहार्थेयुक्तेऽस्तुतोऽप्रधाने तृतीयेति तदर्थः, न तु अप्रधानार्थे वाच्ये इति, तथा च नोक्तार्थसिद्धिः । तस्माद् गुणप्रधानभावस्यार्थत्वमेवेति केषा-ञ्चिन्मतम् । सूत्रेऽप्रधानग्रहणवैयर्थ्यापत्तेश्च । "शिष्येण सहागतो गुरुः" इत्यादौ गुरोरन्तरङ्गत्वेन प्रथमोत्पत्तेरेवौचित्यात् । "पुत्रेण सह पितुरा-गमनम्" इत्यादौ सहार्थतृतीयाया उपपदविभक्तित्वेन षष्ठ्याश्च कार-कत्वेन प्राबल्यस्य "उपपदविभक्तेः कारकविभक्तिर्बलीयसी" इति न्याय-सिद्धत्वात् । अन्यथा "षष्ठीशेषे" इत्यत्रापि विशेषग्रहणापत्तिः । तस्मा-द्यथा "हेतौ तृतीया" इत्यादिशास्त्रं हेतुग्राहकं तथैव "सहयुक्तेऽप्रधाने" इत्यपि तथा । यथैव तत्र प्रकृत्यर्थस्याभेदेन विभक्त्यर्थेऽन्वयस्तथैहापि शक्यो वक्तुम् ।

पातञ्जलास्तु अप्रधानग्रहणपरभाष्यविरोधादप्रधानभावस्यार्थत्व-मेव वदन्ति । अत एवाप्रधानग्रहणं शक्यमकर्त्तुमिति भट्टोजिदीक्षिताः वदन्ति । नागेशभट्टोऽपि अप्रधानग्रहपरं भाष्यमेव समर्थयति । परन्तु पण्डितराजोक्तरीत्या "प्रधाने" इत्यस्य पदस्य सार्थक्ये सिद्धे वैयर्थ्यापा-दनस्यान्याय्यत्वात्, अप्रधान ग्रहणं शक्यमकर्त्तुम् इति वदन्तः परास्ताः । भाष्यवचनं प्रौढिवादमात्रम् ।

न च "पुत्रेण सहागतः पिता" इत्यादौ "पुत्राभिन्नाप्रधानसहितः पिता" इति बोधस्याप्राकरणिकत्वेन नोक्तार्थसिद्धिरिति वाच्यम्, "दण्डेन घटः" इत्यादौ "दण्डजन्यतावान् घटः" इति सकलजनप्रसिद्धबोधे सिद्धे "हेतौ तृतीया" इति सूत्रकृद्वचनबलेन, "दण्डाभिन्न हेतुकोघटः" इति बोधस्य मनोरमाकृतैव दर्शितत्वात् । एवञ्चाप्रधानाभावस्यापि प्रधान-भावस्येव शाब्दत्वमिति रसगंगाधरकाराः । नागेशभट्टोजिदीक्षितयोर्मतानि मनोरमाशब्द--रत्न--भैरवी, मञ्जुषादि ग्रन्थेभ्य आकलनीयमिति कृतमति प्रसक्तेन । रूपकोऽपि गुणप्रधानाभावस्य ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अस्माभिस्तु यत्र यन्मुखेन चमत्कारः, तत्र तन्मुखेनैव व्यवहारः" एवञ्च गुणप्रधानभावनियामकत्वे चमत्कारान्वयव्यतिरेकानुविधायित्वमेव व्यवस्थाप्यते ।

आनन्दवर्धनाभिमतध्वनीनामलङ्कारेष्वेवान्तर्भावः । ध्वनित्वं पुनर्नवत्वाद्यलङ्कृतिविषये दृष्टमिति चेत् पर्यायसादृश्यमूलाप्रशंसादिकाव्ये ध्वनित्वस्य स्फुटत्वात् । न हि व्यंग्यत्वालङ्कारत्वयोरस्ति विरोधः, नित्यव्यंग्यानां रसभावादीनामपि पराङ्गतायामलङ्कारत्वाभ्युपगमात् ।

यच्चाप्युच्यते, यदव्यङ्ग्यत्वमलङ्काराणामिति तदनेन परास्तम् । न हि खलु व्यङ्ग्यत्वालङ्करणत्वयोर्मिथोऽस्ति विरोधः । यथालङ्काराणामलङ्कार्यत्वं तथैव रसादीनामपि रसवदालङ्कारत्वम् । चमत्कारनिबन्धनो ह्यलङ्कारभाव उपमादीनाम् । अलङ्काराणां ध्वनित्वमानन्दवर्धनाभिमतमिति । रसालङ्कारयोरुभयोरपि काव्यशोभाकरधर्मत्वाङ्गीकारात् कविव्यापारस्य धर्ममुखेनैव प्राधान्यमिति रुय्यकाचार्याणां मतानुसारेण भामहस्य सिद्धान्तः । काव्यं धर्मि, अलङ्काराश्च धर्माः । शब्दार्थशरीरस्य काव्यस्य धर्माणामपि शब्दार्थत्वाभ्यां शब्दानां शब्दालङ्कारपदेन, आर्थानाञ्चालङ्कारपदेन व्यवहारः । अलङ्काराणां धर्मत्वेन, तद्धर्मविशिष्टशब्दार्थयो काव्यत्वमिति निर्णयः । गुणालङ्कारयोर्भेदकताबीजमपि वामनेन स्पष्टीकृतम् । गुणालङ्कारयो शोभाकारित्वेन काव्यधर्मत्वम्, उभयोरपि शब्दार्थकृतो भेदः । आनन्दवर्धनाचार्येणापि गुणानां शब्दार्थयोरिव रसधर्मत्वमप्युक्तम् ।

पूर्वरीत्या धर्मप्राधान्यम् उत्तररीत्या व्यापारप्राधान्यम् । उभाभ्यामप्युभयोः सम्बन्धः स्पष्टः । अलङ्करोति अलङ्क्रियते, अलङ्करणमिति व्युत्पत्ति योगात् शब्दार्थयोरलङ्कारोऽपि काव्यमिति वक्तुं शक्यते । ध्वनिशब्दस्येदृश्येव व्युत्पत्तिरभिनवगुप्तपादाचार्यैः कृतेति लोचनादौ स्पष्टम् । अग्निपुराणे ध्वनेरलङ्कारत्वमुक्तम् । "प्रकटत्वमभिव्यक्तिः" । भरतेनापि अभिव्यक्तेश्चर्चाकृतैव । अत एव ध्वनिं काव्यात्मत्वेन व्यवस्थापयता सहृदयशिरोमणिना तस्यैव काव्ये प्राधान्यं व्यवस्थापितम् । शब्देऽर्थव्यापारे च यथालङ्कारपदं शक्तं तथैव ध्वनिपदमित्याकलनीयम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ध्वनिसिद्धान्तानुसारेण ध्वनेस्तारतम्येन काव्यानामुत्तममध्यमादि व्यवस्थाप्युपपद्यते । अलङ्काराणां ध्वनित्वं व्यवस्थापयता गुणीभूतव्यङ्ग्यत्वं नैवोक्तम् अलङ्काराणां च प्राधान्ये वाच्यार्थस्य प्राधान्यं प्रतीयमानार्थस्य च गौणत्वम् ।

रसादीनां स्थायिसञ्चारिता रसान्तरेष्वितिवदलङ्काराणामप्युपस्कारकत्वमुपस्कार्यत्वञ्च न विरुध्येते । रसस्य स्थायित्वसञ्चारित्ववदलङ्कारत्वस्यापिगुरुप्रभृतिभिरुपपादितत्वात् । "रसादिरर्थः स्वप्नेऽपि न वाच्यः" इति नियमः रसादीनामलङ्कारत्वं प्रतिबध्नाति । आनन्दवर्धनस्तु रसादीनां गुणीभावेऽलङ्कारत्वमेव व्यवस्थापयति ।

एवं दण्डि-भामहानन्दवर्धनाचार्याणां रीत्या काव्ये द्वयोरेव तत्त्वयोरुपयोगाच्चमत्कारितेति सारांशः । सर्वेषामपि काव्यधर्माणां रसाभिव्यञ्जकत्वमित्येव ध्वनिकृतां निर्णयः ।

प्राचां रीत्या, ध्वनिगुणरीतिवृत्ति-दोषादीनां शब्दतदर्थोभयगतत्वं न ध्वनिकाररीत्या वाचक-वाच्यभूतानां वर्णपदवाक्यादीनामन्येषाञ्च काव्यशोभाहेतूनां रसादिव्यञ्जकतया व्यवस्थिता । तेन गुणालङ्कारयोरन्तरमपि स्फुटीकृतम् । अङ्गिनोरसस्यैव वाच्यसंस्पर्शो निषिद्धः । अंगभूतानां रसादीनां विभावानुभावादीनां स्वशब्दवाच्यत्वं न दोषाय । परमप्रयोजनीभूतस्य रसस्यैव मुख्यार्थत्वमत एव "मुख्यार्थहतिर्दोषः" इति काव्यप्रकाशकृत् ।

रसादिरूपाणां व्यंग्यार्थानां वाच्यसामर्थ्याक्षिप्तत्वमिति नियमः । सर्वेषामेवार्थालङ्काराणां ध्वनिमार्गतास्ति । यतो हि रसाः वाच्यविशेषैरेवाक्षिप्तव्याः, तत्प्रतिपादकैश्च शब्दैस्तत्प्रकाशिनो वाच्यविशेषा एव रूपकादयोऽलङ्कारः तस्मात्तेषामपि रसाभिव्यक्तावन्तरङ्गत्वमेव । अलङ्कारो हि बाह्यालङ्कारसाम्यादंगिनो रसस्य चारुत्वहेतुरुच्यते । रूपकादिर्वाच्यालङ्कारवर्गो यदि समीक्ष्य काव्येषु विनिवेश्यते रसादीनामर्थानां चारुत्वहेतुर्निष्पद्यते । शब्दशक्त्याक्षिप्तालङ्काराणां वाच्यत्वम्, अर्थशक्त्या तथाभूतानां तेषां ध्वनित्वमिति विवेकः ।

किञ्च वाच्यतया प्रसिद्धानामलङ्काराणां, स्थितिविशेषेण प्रतीयमाना-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्वं ध्वनिकृत्पूर्वभाविभट्टोद्भटादिभिः व्यवस्थापितम् । प्रतीयमानानामर्थानां वाच्यार्थोपस्कारकत्वमेवेति प्राचां नियमः । ध्वनिकृता वाच्यार्थानामपि प्रतीयमानोपस्कारकारित्वमपि नियमितम् । अतो यत्र वाच्यालङ्कारमुखेनैव चारुत्वनिष्पत्तिस्तत्र तन्मुखः काव्यत्वव्यपदेशः, यत्रेतरत्ये, तन्मुखेनेति न्यायसिद्धम् । शब्दार्थव्यवहारे च प्रसिद्धिरेव प्रमाणम् सा च शास्त्रीया, लौकिकी च । प्रसिद्धानां स्वतःसिद्धत्वेन न्यायशब्देनापि व्यवहारः उपमारूपकदीपकातिशयोक्तिवक्रोक्तीनामलङ्कारत्वे नवाच्यार्थविभावकत्वात् प्रतीयमानस्यार्थस्य च तदुक्तिबलादवलोपलभ्यत्वादेव, वाच्यार्थपूर्विकाप्रतीयमानार्थप्रतीपत्तिर्भवति ।

लोकस्वभावानां शब्दानुकृतिः काव्यं, आङ्गीकी च सा नाटकम् । लोकस्वभावानुकृतिरेव नाट्यम्, नृतेर्गात्रविक्षेपार्थकत्वान्नाट्यानामभिनयप्रधानत्वम् । अभिनेयमनभिनेयं च काव्यं भवति । उभयत्र रसस्येव प्राधान्यम् । अत एव वाक्यं रसात्मकं काव्यमित्युपक्रम्य "दृश्यश्रव्यविभेदेन पुनः काव्यं द्विधामतम्" इत्युक्तं सङ्गच्छते ।

२. काव्यार्थ विचारः

काव्यशरीरं यथा शब्दार्थरूपं तथैव काव्यार्थोपि शाब्द आर्थश्चेति द्विविधः । तथा हि–

मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥

अत्र "हे निषाद यतस्त्वं क्रौञ्चमिथुनात्काममोहितमेकमवधीः, ततः प्रतिष्ठां मा गम" इत्यर्थो वाच्यः । "मा निषाद" पदयोः श्लेषः । चमत्कारस्य "मा" पदान्वयव्यतिरेकानुविधायित्वात् । करुणो रसः । वैदर्भी रीतिः । प्रसादो गुणः ।

परन्तु "न ते वागनृता तात काचिदत्र भविष्यति" इति वचनस्यारस्यात् मंगलार्थत्वेन– "हे मानिषाद, माराजराजेश्वरी, महालक्ष्मीसीता," सीतायाश्चरितं महत् । सा च पूर्णानुरागरससंसारसरोवरसमुद्भूतसरोजरूपा । तस्यां निःशेषेण सीदति इति निषादः, सीतापतिरित्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वं काममोहितं क्रौञ्चयोरन्यतरमवधीः ,अतः शाश्वतीः समाः दीर्घकालपर्यन्तं प्रतिष्ठामगमः । रामपक्षे मङ्गलाशंसा, रावणपक्षे चामङ्गलाशंसा उभयोरप्यर्थयोः सहृदयहृदयाह्लादजनकत्वम् । कविनिष्ठरावणविषयिणी जुगुप्सा, रामविषयककविनिष्ठारतिश्च व्यज्येते । एवञ्च काव्यार्थो द्विविधः वाच्यः प्रतीयमानश्च । उभयत्र कविविवक्षास्ति । उभयोरप्यर्थयो समानमेव सहृदयहृदयसंवादकारित्वम् । उभावपि सत्यावेव, न मिथ्या किञ्चित् । अत एव रामादिवत् वर्तितव्यं न रावणादिवत् द्वयमपि काव्यप्रयोजनमपि । "मा" पदमेवात्र जीवितम् । पदान्तरसहस्रैरपि तदर्थासिद्धेः अत एवोभयोः साहित्यमेव काव्यम् ।

भरतकृतनाट्यशास्त्रमेव लक्षणम्, वाल्मीकिमुनिविरचितं सीताचरितमहाकाव्यं च लक्षणम् । रस एवालङ्कार्यः, प्रतीयमानत्वाच्च वर्ण्यः भोग्योनुमेयो वा । भवभूतिमतानुसारेण वाल्मीकि–भरतयोः समकालिकता ।

सोऽर्थो वाच्यसामर्थ्याक्षिप्तवस्तुमात्रमलङ्काररसादिरूपश्च प्रतीयमानानुप्राणितकाव्यनिर्माणनिपुणप्रतिभात्वेनमहाकवित्वलाभः । यदेवं विधमस्ति तदेव भाति अत्यन्तासतो भानानुपपत्तेः । रजताद्यपि नात्यन्तमसद्भाति अनेन सत्त्वप्रयुक्तं तद्भानमिति भानात्सत्त्वागमोऽपि ।

तत्र प्रतीयमानस्यार्थस्य द्वौभेदौ, लौकिकः यः स्वशब्दवाच्यत्वं सहते, कदाचिच्च नापि । स च विधिनिषेधाद्यनेकप्रकारो, स एव वस्तु शब्देनोच्यते । आनन्दवर्धनस्तु–

प्रतीयमानं पुनरन्यदेव
वस्त्वस्ति वाणीषु महाकवीनाम् ।

इत्याह, तच्च प्रसिद्धम्, अर्थात् सर्वप्रतीतमलङ्कृतञ्च । प्रसिद्ध वाच्यं र्थम्, प्रतीयमानेन व्यतिरेकेणतद्वत् तथा भासमानत्वात्, लावण्योपेताङ्गनादिवत् । तदेव प्रतीयमानं प्रसिद्धं वस्तु, स्वभावस्तदुक्तिश्च स्वभावोक्तिः । परन्तु महाकवीनां वाणीषु ललनालावण्यप्रख्यं मुक्ताफलविच्छुरितच्छायाप्रतिमं यद्वस्त्वस्ति तत्त्वन्यदेव । तद्वाक्यसंस्थानाभिव्यंग्यमवयवव्यतिरिक्तं धर्मान्तरम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न चावयवानामेव निर्दुष्टत्वमलङ्कारयोगो वा लावण्यमिति वक्तुमुचितम् । लोके वैपरीत्यदर्शनात् । पृथगारम्भसमानकाजत्वसञ्जत्वादिदोषरहितशरीरावयवयोगिन्यामलङ्कृतायामपि कामिन्यां "लावण्यशून्येयम्" इति, अयथाभूतायामपि तस्यां "लावण्यामृतमूर्तिरियम्" इति रसिकानामपि व्यवहारात् ।

यश्चपूर्वं क्वापि वाक्यार्थेऽलङ्कारतामुपगतमुपमादिरूपतामन्वभूत्, इदानीं त्वनलङ्कारतामवाप्तः, सोऽलङ्काररूप एवान्यत्रगुणीभावात्, पूर्वप्रत्यभिज्ञानबलेनालङ्कारत्वव्यपदेश्योऽस्ति । ब्राह्मणश्रमण न्यायात् । तद्रूपतामात्रेण तूपलक्षितं वस्तुमात्रमुच्यते ।

यस्तु स्वप्नेऽपि न स्वशब्दवाच्यतां सहते न च लोकव्यवहारपतितः, किन्तु काव्योपात्तपदादिसमर्प्यमाणहृदयसंवादरमणीयविभावानुभावसमुचितप्राग्विनिविष्टरत्यादिवासनानुरागसुकुमारस्वसंविदानन्दचर्वणाव्यापाररसनीयो रसः, स तु काव्यव्यापारमात्रगोचरो, स एव वस्तुतः काव्यार्थः । स एव मुख्यः अंगी, आत्मा इत्यादि पदै रसशास्त्रकारैर्व्यवह्रियते । रसादिरूपोऽर्थः वाक्यस्य शक्त्याक्षिप्तः प्रकाशते । न तु साक्षाच्छब्दव्यापारस्य विषयः । तस्माद्वाच्यात् भिन्न एव रसादिरर्थः ।

वाच्यत्वं तस्य स्वशब्दनिवेदितत्वेन वा स्यात् विभावादि प्रतिपादनद्वारेण वा । पूर्वत्र स्वशब्दनिवेदितत्वाभावे रसादीनामप्रतीतिप्रसङ्गः । स्वशब्देन सा प्रतीतिरनूद्यते, नानुभूयते । न हि केवलशृंगारशब्दभाजिविभावादिप्रतिपादनविरहिते काव्ये मनागपि रसादि प्रतीतिर्भवति । यतो शब्द निवेदितत्वाभावेऽपि रसवत्ताप्रतीतिरस्ति । तस्मात् अन्वयव्यतिरेकानुविधायित्वेनाभिधेयसामर्थ्याक्षिप्तैव रसाद्यर्थप्रतिपत्तिः । तस्माद्रसादीनामभिधेयत्वं वाच्यत्वं नास्ति । वाच्येन सहैव रसादिप्रतीतिर्भवतीति वाच्यार्थस्य रसादिप्रतिपत्तावुपयोगोऽवश्यमेवास्ति । विविधवाच्य-वाचक रचनाप्रपञ्चचारुणः काव्यस्य स एवार्थः सारः । औचित्यात्स्थायिनो रसतापत्तिः । रसाद्यतिरिक्तयोः वस्त्वलङ्कारध्वन्योरपि औचित्यादेव काव्यजीवितत्वम्, पर्यन्ते वाच्यो रसान्तःपातित्वात् ।

एतेन रसादेरर्थस्य गुणेऽलङ्कारे वान्तर्भावो न शक्यसमर्थनः । अल-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ङ्कारस्यालङ्कारान्तरच्छायानुग्रहे रसस्याप्राधान्येन विवक्षितत्वात् न मुख्यत्वम् । अलङ्कारद्वयसम्भावनायामपि व्यंग्यवाच्ययोः समं प्राधान्यम् । प्राधान्ये व्यंग्यत्वमप्राधान्ये वाच्यत्वम् । वाच्यव्यंग्ययोरर्थयोः पदार्थवाक्यार्थन्यायो वा, निमित्तनिमित्तीभावो वा, जीवशरीरव्यवहारो वा घटतदुपादानकारणन्यायो वा, बिम्बप्रतिबिम्बभावो वा, वस्तुप्रतिवस्तुभावो वा, प्रकृतत्वा प्रकृतत्वम् वेत्यादि न्यायविकल्पाः प्रसरन्ति । तदयमत्र संक्षेपः ।

"व्यंग्यस्य यत्राप्राधान्यं वाच्यमात्रानुयायिनः ।
समासोक्त्यादयस्तत्र वाच्यालङ्कृतयः स्फुटाः ॥"
व्यङ्ग्यस्य प्रतिभामात्रे वाच्यार्थानुगमेऽपि वा,
न ध्वनिर्यत्र वा तस्य प्राधान्यं न प्रतीयते ॥

नैवं वाच्योऽपि ध्वनिः, वाचकोऽपि ध्वनिः, "ध्वन्यते" इति व्युत्पत्तेः । शब्दानामपि ध्वननमेव । तच्च नाभिधादिरूपमपितु सर्वविधबाधवैधुर्यनिपुणं व्यञ्जनमेव । ध्वनिपदस्य शब्दात्मकत्वात् ।

ध्वनेर्महाविषयत्वेन व्यापकत्वादलङ्काराणां तदपेक्षयाल्पीयस्त्वेन व्याप्यत्वान्नालङ्कारेष्वन्तर्भावः । न च लक्षणया गतार्थता तस्येति वाच्यम्, मुख्यार्थबाधाद्यभावात् । अभिधेयलक्ष्ययोरर्थयोः व्यञ्जकत्वेन परिग्रहाच्च ।

एवं ध्वनिसिद्धान्तशय्यामधिरुह्यरसस्य काव्यात्मत्वं वाल्मीकिभरताभ्यां लक्ष्यलक्षणमुखेनैव निर्णीतम् । काव्यार्थस्य न केवलं वाक्यार्थत्वम् । न वा केवलं लक्ष्यार्थत्वमपितु वाच्यत्वाद्यर्थशक्तिवेद्यत्वेन तयोरतिरिक्तस्य रसादिलक्षणस्यार्थस्य चास्तित्वमेव प्रतिष्ठापितम् ।

३. नाट्यशास्त्रे ध्वनिसिद्धान्तः–

ध्वनेरात्मभूताव्यञ्जनैवास्तीतिकाव्यव्यापारविशेषरूपेणास्य साहित्यशास्त्रे आनन्दवर्धन एव स्थापनां व्यधात् । वस्तुतस्तु आनन्दवर्धनात् प्रागप्यस्यसत्तासीदेवेति नाट्यशास्त्राग्निपुराणादिषु भरतव्यासादिभिरप्यंगीकृतत्वात् । तथा हि–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

"अष्टौ भावाः स्थायिनः ।
त्रयस्त्रिंशद्व्यभिचारिणः ।
अष्टौ सात्त्विकाः।
एते काव्यरसाभिव्यक्तिहेतवः ।
(ना. शा. बडोदा, पृ. ३४८।७ वा)

अपरत्र चानेनैव
काव्यार्थसंसृतेर्विभावानुभावव्यञ्जितैः ।
एकोनपञ्चाशद्भावैः अभिनिष्पद्यन्ते रसाः ।
(ना. शा. बडोदा, पृ. ३४९।७ वा)

"नानाभावाभिनयव्यञ्जितान् वागङ्कुशत्वोपेतान् ।
स्थायिभावानास्वादयन्ति सुमनसः" ॥
(ना. शा. व. सं. ६।२८८) ।

एवं भरतेनैव काव्यानां (नाट्यानां च) व्यञ्जकत्वमुक्तम् आनन्दवर्धनपूर्वभाविना भट्टोद्भटेनापि पर्यायोक्तालङ्कारविवरणे व्यञ्जनापरपर्यायस्यावगमनव्यापारत्वमुपपादितमेव–

पर्यायोक्तं यदन्येन प्रकारेणाभिधीयते ।
वाच्यवाचकवृत्तिभ्यां भिन्नेनावगमात्मना ॥

काव्यालङ्कारसारसंग्रहे प्रतीहारेन्दुराजेनावगमोऽनुमानमेवेति यदुक्तम्, तदकिञ्चित्करमेव । अन्यानुमीयमानवैलक्षण्येन रसादीनामनुमेयत्वमपि वक्तुं सुशकम् । भक्तिरसार्णवेऽपि तदिङ्गितत्वात् । व्यञ्जनायाः कृतेऽवगमनपदप्रयोगोध्वन्यालोकेप्यसकृदवलोक्यते ।

महाभारतेऽपि शास्त्ररूपे काव्यच्छायान्वयिनि वृष्णिपाण्डवविरसावसानां वैमनस्यदायिनीं समाप्तिमुपनिबध्नता महामुनिना वैराग्यजननतात्पर्यं प्राधान्येन स्वप्रबन्धस्य दर्शयता मोक्षलक्षणः पुरुषार्थः, शान्तो रसश्च मुख्यविवक्षितत्वेनोक्तः । "सिषेव आत्मन्यवरुद्धसौरतः सर्वाः शरत्काव्यकथारसाश्रयाः" इति श्रीमद्भागवतमहापुराणेऽपि काव्यरसानामुल्लेखः । किञ्चाग्निपुराणे भरतोक्तप्रणाल्यैव रसस्वरूपमपि भगवता व्यासेनैवोपवर्णितम् । "भागवातं रसमालयम्" इत्यत्र भागवतरसस्यापि स्वातन्त्र्यम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स एव भगवान् निर्वक्ति । स एव भरतोक्तरीत्या अप्राकृतो रसः । अपि च–

"प्रकटत्वमभिव्यक्तिः
श्रुतिराक्षेप इत्यपि"

इत्यनेनाभिव्यक्तिशब्दादेव व्यञ्जनायाः व्यापारत्वमप्युक्तम् ।

"वाग्वैदग्ध्यप्रधानेऽपि,
रस एवाऽत्र जीवितम्"

इत्यनेन काव्यस्यात्मारसः अप्राकृतः प्राकृतश्च, अप्राकृतालम्बनोऽप्राकृतो रसः, प्राकृतालम्बनात्मकत्वात्प्राकृतः । आद्यश्चाखण्डः, अन्यश्च शृङ्गारादिरूपः । शान्तस्य रसत्वव्यवस्थापनमपि भगवताव्यासेनैव कृतम् अत एव काव्येषु शान्तरसस्यांगित्वमपि आनन्दवर्धनेनाप्यङ्गीकृतम् ।

भामहादिभिरपि लोकप्रसिद्धातिरिक्तार्थशब्दयो साहित्यात् काव्यमित्युक्तम् केनापि काव्येऽलङ्काराणां काव्यात्मत्वं कुत्रापि नोक्तम् । अलङ्काराणां काव्यार्थविभावकत्वमेव तु भामहेनोक्तम् । भरतप्रोक्तानां रसानामपि काव्यार्थविभावकत्वान्यलङ्कारान्तः पातिता प्रोक्ता । एवं भरतमुनिमारभ्य वामनाचार्यं यावत् प्रायः सर्वैरेवाचार्यैं प्रतीयमानार्थस्य सत्ता स्वीकृता । तदर्थावगमार्थं व्यञ्जनारूपस्य व्यापारस्यापि सत्ता आनन्दवर्धनपूर्वभाविभिरेवाभ्युपमता ।

"ध्वनि" शब्दस्य प्रयोग आनन्दवर्धनाचार्यात् प्राक काव्यालङ्कारेप्यस्ति । तेनोक्तम्–

"रूपस्थैरपि चादेयं वचो न स्फोटवादिनाम्,
नभः कुसुममस्तीति श्रद्दध्यात्ः क सचेतनः ॥"
(६।१२)

यदि गौरित्ययं शब्दः कृतार्थोऽन्यनिराकृतौ ।
जनको गविगो बुद्धेर्मृग्यतामपरोध्वनिः ॥
अर्थज्ञानफलाः शब्दाः न चैकस्य फलद्वयम् ।
अपवादविधिज्ञाने फले चैकस्य वा कथम् ? ॥
पुरागौरिति विज्ञानं गोशब्दश्रवणाद् भवेत् ।
येनाऽगोप्रतिषेधाय प्रवृत्तो गौरिति ध्वनिः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तदेतत्सर्वं व्याकरणमहाभाष्ये विस्तरेणोक्तम् । अत्र "नहिगौः स्वरूपेण गौर्नापि अगौः, गोत्वाभिसम्बद्धाद्गौरिति भर्तृहरिमतानुसारि काव्यप्रकाशोद्धरणं तुलनीयम् । वाक्यपदीयकारकाव्यालङ्कारयोः पौर्वापर्यमैतिहासिका एव विमृशन्तु । काव्यालङ्कारे ध्वनिशब्दस्य प्रयोगः प्रथमतः भामहेनैव कृतः । अतस्तन्मतानुसारिभिरालङ्कारिकैरपि । व्याकरणदर्शनेमहाभाष्ये, च "ध्वनिः शब्दा" इति पक्षेऽस्ति । तदनुसारेण शब्दार्थयुगलस्यापि व्यञ्जकत्वं व्यङ्ग्यत्वं च साहित्यशास्त्रे प्रसिद्धम् । वाक्यपदीयमतमाश्रित्यानन्दवर्धनाचार्यस्य ध्वनिसिद्धान्तः लोचनाकृतामहता संरम्भेण व्याख्यातम् ।

वाच्य-लक्ष्ययोर्व्यतिरिक्तस्य व्यंग्यार्थस्य तद्बोधिकायाः व्यञ्जनावृत्तेश्च निरूपणे दत्तावधानेनानन्दवर्धनाचार्येण मीमांसान्यायाः साहित्यशास्त्रे समवतारिताः । दोषत्यागाय तर्कशास्त्रीयानां निरूपणं न्यायानां भामहादन्यत्र नोत्पश्यामः ।

काव्यशरीरविषयेध्वनिकारः कमपि स्वपक्षग्रहणं न प्रावर्शयत् । काव्येषु गुणालङ्काराणां चमत्कारान्वयव्यतिरेकानुनिधायिनी रसानुरोधिनी च समीक्षा आनन्दवर्धनकृतैव । तेन काव्यशरीर (लक्षण) विषये यत्र तत्र स्वस्मात्पूर्वभाविनां मतानि, कण्ठतः प्रोक्तानि तानि चेमानि–

१) विशिष्टार्थप्रतिपत्ति हेतुः शब्दसन्दर्भविशेषः ।
२) वाच्यवाचकसम्मिश्रः शब्दात्मा काव्यम् ।
३) शब्दार्थशरीरं तावत् काव्यम् ।
४) शब्दार्थयोः साहित्येन काव्यत्वम् ।
५) सहृदयहृदयाह्लादकारि शब्दार्थमयत्वमेव काव्यलक्षणम् ।
६) विविधवाच्य-वाचकरचना प्रपञ्चचारु काव्यम् ।
७) काव्यं हि ललितोचितसन्निवेश चारु ।
८) वाच्यानां वाचकानां च यथौचित्येन योजनम् ।
रसादिविषयेणैतत्कर्ममुख्यं महाकवेः ॥
९) इत्याक्लिष्टरसाश्रयोचितगुणालङ्कारशोभामृते ।
यस्मादवस्तु समीहितं सुकृतिभिःसर्वं समास्वाद्यते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

काव्याख्येऽखिल सौख्यधाम्नि विबुधोद्याने ध्वनि र्दर्शितः ।
सोऽयं कल्प तरूपमानमहिमा भोग्योस्तु भव्यात्मनाम् ।।

इत्थं सः काव्यशरीरविषये शब्दप्राधान्यपक्षं, शब्दार्थयुगवादंञ्चो-पस्थापयति । समन्वयभावोपि स युग्मवादमेव सिद्धान्तयतीति ध्वन्या-लोकाक्षरस्वारस्यादुक्तं भवति । तस्मादानन्दवर्धनमते–सहृदयहृदयाह्ला-दकारिशब्दार्थसंमिश्रः काव्यमित्यायाति । श्रुतिस्मृति–पुराण–रामायण–महाभारत– महाकाव्यानां लक्ष्यलक्षणपौरुषेयार्थ वाङमयानामाधारेणैव ध्वनिः प्रतिष्ठितः । अत एव च निगमप्ररूढादानादि परम्परापरस्य "समाम्नातः" इति शब्दस्योपक्रम एव कृतः ।

आनन्दवर्धनाचार्यः स्वस्मात्पूर्वाचार्याणामेव मतानि पर्यालोच्य गुणालङ्काररीतिवृत्तीनां नित्यानित्यदोषाणां च व्यवस्थायै सैद्धान्तिकमा-धारं निर्ममे । शब्दशक्तिविचारस्तु साहित्यशास्त्रे यथा तेन कृतं तथा नैव केनापीति वक्तुं शक्यते । काव्यतत्त्वानां स्फुटीकरणार्थं तेन नैयातिकी शैली समाश्रिता । सा पञ्चावयवात्तिका, पञ्चाधिकरणात्मिका चेति वक्तुंमपि पार्यते । तत्पूर्वभाविनाभामहेन दण्डिमतचिखण्डयिषया काव्या-लङ्कारे दण्डिनामानुल्लेखेनैव काव्यादर्शानुकरणमेव कृतम् । दण्डि–भामह-वाक्यपदीयकाराणां समसामयिकता आकलनीया । दिङ्नागाचार्यानन्त-र्भावी भामहः इति विद्वांसो वदन्ति ।

आनन्दवर्धनाचार्यस्येदमपरं वैशिष्टयमिति यत्स साहित्यशास्त्रे नियमानपि निर्धारयति । ध्वनिसिद्धान्त एव वस्तुतः साहित्यशास्त्रे सिद्धान्त । ततः प्राक साहित्यशास्त्रेत्वव्यवस्थैवावलोक्यते विषयविभा-गार्थे ये नियमाः तेन निर्धारिताः, त एव साहित्यशास्त्रे मौलिकाः नियमाः सन्ति । काव्यसमयानां तदाधारेणेव व्यवस्थाभवितुमर्हति । तदुत्तरभावि-नां ग्रन्थेषु तदुपदिष्टैव सिद्धान्तसरणिराश्रिता ।

अलङ्काराणां ध्वनिसिद्धान्तरीत्या परिष्कारोत्तरवर्त्तिभिः कृतः । दोषाणामलङ्काराणां च विविक्तो ध्वनिसिद्धान्त एव प्रदीपः । साहित्य-शास्त्रीयनियमानां न्यायानां तन्निर्धारितं स्वरूपमेव वस्तुतः मौलिकम् ।

लोचनकारेण, ध्वनिसिद्धान्तस्य व्याख्या कृता । तत्कृतं रससिद्धान्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्य निरूपणमद्यापि तथैव सर्वैरङ्गीक्रियते, इति आनन्दवर्धनाचार्याणां सहृत्वातिशये प्रमाणम् । व्यञ्जनास्थापनानन्तरमेव साहित्यशास्त्रं वस्तुतः शास्त्रीयामाधारभूमिकामवापेति स्थितिशब्दशक्तिविवेचनं यथा साहित्यशास्त्रेऽस्ति, तथा नान्यत्रेति काव्यप्रकाशस्य प्रामाण्यमुद्भावयता श्रीमता नागोजिभट्टेनापि मञ्जूषायामुक्तम् । गदाधरभट्टेन च व्युत्पत्तिवादेऽपि आनन्दवर्धनेन रससूत्रव्याख्यानं, शब्दशक्तिविवेचनं न कृतम्, परन्तु यत्र तत्र तेनापि तत्कृतमेवेतिमन्ये । तान्येव शब्दशक्तिनिरूपणतत्त्वानि लोचने मीमांसा न्यायैः स्फुटीकृतानि ।

शब्दार्थयोः साहित्यस्य काव्यत्वमङ्गीकृत्य कविपरम्पराप्रसिद्धस्य साहित्यतत्वस्य स्फुटीकरणमपि ध्वनिसिद्धान्ते निकर्षेणैव कर्तुं शक्यते । भरताचार्यः साहित्यस्य रसनिस्पादने साक्षादेव कारणतामुपजानीते । विभावादीनां साहित्यादेव रसनिष्पत्ति नियमात् । एतेन "साहित्यशास्त्रम्" अभिनवा संज्ञेति वदन्तः प्रत्याख्याताः । मदुक्तनीत्या साहित्यशास्त्रमेववस्तुतः शास्त्रस्यास्य संज्ञापदवीं लभते । एवं साहित्यसम्प्रदायस्य "ध्वनिसिद्धान्तः" एव मुख्यः सिद्धान्तः । व्यञ्जनैव मुख्यावृत्तिः, रस एव मुख्यार्थः । स च रसोवै सः इति श्रुतिस्वारस्यात् रत्याद्यवछिन्ना भग्नावरणचिद्रूपः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रससिद्धान्तः

१. औपनिषदभूमिका:

"रसो वै सः" इति तैत्तिरीयश्रुत्या ब्रह्मैव रसानन्दादिशब्दैर्व्यपदिश्यते। तस्यैव निरुपाधिकपरप्रेमास्पदत्वेनात्मत्वमपि। प्रेम्णः स्वात्मस्वरूपत्वेन तद्दृश्यताया अप्यात्मवश्यतेव, "सर्वमात्मवशं सुखम्" इति मानवोक्तेः। तदेव "वीचीतरंग" न्यायेन ब्रह्माभिन्नमात्मतत्वं तत्तदन्यभगवदभिव्यक्तरूपेण किं बहुना, सर्वप्रपञ्चरूपेणापि रसिकैरनुभूयते। निरतिशयनिरुपाधिकपरप्रेमास्पदस्य प्रेमानन्दादिमयस्य "सर्वं हितमयस्य" भगवत एव सर्वरूपत्वात् (शत. १३।६।१)।

"सत्यं शिवं सुन्दरम्" इत्यस्येदमेवतात्पर्यं यद्यत्सत्यं तदेव सुन्दरम् यथा सत्ययोगेनासत्यमपिजगत्सत्यमिव भाति, शिवयोगेनाशिवमपि शिवायते, मंगलायते, तथैवासुन्दरमपि जगत्तत्संसर्गेणैव सुन्दरं भवति। अतः सौन्दर्यस्त्रीपुन्नपुंसकादिभिन्नं सर्वरूपञ्च तत्तदुपाधिभेदेन भिन्नमिवानुभवगोचरीक्रियते। "क्षणे क्षणे यन्नवतानुपेति" इति न्यायात्। सात्विकवृत्तिविशेषस्य भगवदानन्दव्यञ्जकत्ववत् व्यञ्जकतारतम्येन व्यङ्ग्यतारतम्यानुभूतिः। यथा पुण्यविशेषेण भगवदानन्दव्यञ्जकसात्विकवृत्तिलाभस्तथैव पुण्यविशेषेणैव विशिष्टसत्वोद्रेकात्तेषु तेषु सौन्दर्यव्यञ्जकसन्निवेशौचित्यं प्रमातृषु तदनुभवप्रयोजकं सरसत्वादिकं च जन्यते। अनन्तपारमगाधं सौन्दर्यस्वरूपं यत्र यावतांशेन सत्वमुद्रिच्यते तत्र तावतांशेन तदभिव्यज्यते। नवनवोन्मेषशालिन्या सात्विकवृत्या रमणीयता अखण्डरसेऽपि भाति। अत एव "अन्तःकरणस्यैव धर्मविशेषः सौन्दर्यमुच्यते।" भवति सौन्दर्यमङ्गानां सन्निवेशे तदेव सौन्दर्यमलङ्का-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्पदाभिलप्यम् । तेन शरीरादिसौन्दर्यलक्षितम् । तत्रापि सन्निवेशौचित्यादिकमपि सौन्दर्याभिव्यञ्जकमेव । तेन न बाह्यवस्तुगतं मुख्यं सौन्दर्यम् सौन्दर्यसिन्धोर्भगवत एवान्यत्र यथाकर्म यथाश्रुतं सौन्दर्यादिकं वितीर्यते । इदमेववामनाचार्याभिप्रेतम् । "सन्निवेश" एव रीतिः ।

यत्र सौन्दर्यातिशयस्तत्रैव कामः, यत्र कामस्तत्रैव प्रेमाऽभिव्यज्यते । श्रुतिरपि आत्मकामशेषत्वेनैवान्यत्र प्रेम दर्शयति । "आत्मनस्तु कामाय सर्वं प्रियं भवति । अत एवान्येषां सोपाधिकप्रेमविषयत्वेन सातिशयप्रेमास्पदत्वम् । आत्मनस्तु निरुपाधिकप्रेमविषयत्वेन निरतिशयप्रेमास्पदत्वम् । कामेच्छाप्रेम्णां अवान्तरभेदवत्वेऽपि वस्तुसौन्दर्यानुभाव साधनत्वं समानमेव ।

२. प्रेमसौन्दर्यवादः

यद्यपि लोके प्रेमसौन्दर्ययोः विषयविषयिभावेन भिन्नाश्रयत्वेन भेदो दृश्यते, तथाप्युभयोरेकप्रकृतिकत्वमव्याहतमेव, चक्षूरूपयोर्विषयविषयित्वेऽपि एकतेजः प्रकृतिकत्वात् । यद्यपि स्थूलदेशकालादिवशात् प्रेमसौन्र्ययोः पार्थक्यमनुभूयते तथापि तयोः सहजः सम्बन्धो लोकेऽपि स्फुटं दरीदृश्यते । यावतांशेन काव्य सङ्गीत-कला-नाटकादिभिर्देशकालोपाध्यतिक्रान्तः तावतांशेन "सहजत्वम्" व्यक्तो भवति । तेनैव सहृदयेषु प्रेमसौन्दर्यरसाभिव्यक्तिः । सौन्दर्यं प्रेमपरिष्वक्तं प्रेम च सौन्दर्यालिङ्गितं साक्षात् क्रियते । रसार्णवस्यैव सौन्दर्यमाधुर्ये उत्तालतरङ्गे । तथा चोक्तम् ।

> महानन्दसुधाम्बोधिरनुरागतरङ्गितः ।
> प्रेमसौन्दर्यधाराभिरभिकृष्टः स्मराम्बुदैः ।।

सौन्दर्यं प्रेममयं, प्रेम च सौन्दर्यमयम् । समानेन रसेन परिप्लुतद्वयमप्यन्योन्यमयपरस्परासङ्गिजलमीनायमान, अत एवान्योन्यप्रेमसौन्दर्येऽन्योन्यप्रतिबिम्बिते भवतः । तेनैव प्रेमात्मकं सौन्दर्यं सौन्दर्यात्मकञ्च प्रेमाभिव्यज्यते । सौन्दर्यमयं प्रेमशिवः प्रेममयं सौन्दर्यमेव शक्तिः । प्रेमसौन्दर्यमय "शिवशक्तिसाहित्यस्य" सबाह्याभ्यन्तरमन्योन्यालिङ्गितत्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मविविक्तत्वञ्च । अत एव कः प्रेमसारसर्वस्वविग्रहः, कश्चसौन्दर्यसार सर्वस्वविग्रह इत्यपि निर्णेतुं न शक्यते । तदुक्तम्–

अन्विष्यान्विष्य रसिकाः परिश्राम्यन्ति नित्यशः ।
कः प्रेमा किञ्च सौन्दर्यं तयोर्नैवाधिजज्ञिरे ॥

तथात्वेऽपि नितान्तमैक्येऽपि रसविशेषसिद्धये तयोर्वैलक्षण्यमिष्यत एव ।

प्रेमैव परमाराध्यभगवत्तत्त्वमपि, परमज्ञानप्रयोजको, ज्ञानधनश्च, स एवात्मा । तस्यैव निरुपाधिकपरप्रेमास्पदत्वात् । स एव सर्वसुखहेतुत्वात् "हित" पदव्यपदेश्योऽपि गुरोरिष्टस्य चाभेदः सुप्रसिद्ध एव ।

३. ब्रह्मरसवादः

वस्तुतस्तु निरुपाधिकं ब्रह्मैव "रस-आनन्द-हितं" प्रभृतिभिः पदैर्व्यवह्रियते । तस्यैव निरुपाधिकपरप्रेमास्पदत्वेनात्मत्वमपि । तस्यैवानन्तानन्तचन्द्रसिन्धुसमुद्भूत दिव्यातिदिव्यचन्द्ररूपस्य कोटिकोटिकन्दर्पलावण्यस्य निरतिशयनिरुपाधिकपरप्रेमास्पदत्वं स्फुटमेव । तदेव हिततमम् । तस्यैव सह भावस्य यथावत्वेन कमनीयत्वमपि । तदेकमनाद्यमनन्तमखण्डमशब्द सरूपम् शुद्धमपापविद्धमेव "कवि" पदाभिलप्यम् । तस्यैव लोकोत्तरस्य कर्मार्थविशेषविशिष्टं वेदाः काव्यम्–

"पश्य देवस्य काव्यम्,
न ममार न जीर्यति ।

इन्द्रप्रतर्दनसम्बादपरायां कौषितक्रिश्रुतौ ब्रह्मण एव हितत्वमुचितम् । हितं कल्याणाद्युपकारकं वस्तूच्यते । तच्चानेकविधम् । तत्रातिशयेन यद्धितम् तदेव हिततमं भवति । "वरं वृणु" इतीन्द्रेणोक्तः प्रतर्दनः' यन्मनुष्याय हिततमं वेत्येतदेव मे ब्रूहि इति वरं वव्रे । "हिततमरूपेणमामेवोपास्व" इतीन्द्रेणोक्तम् । हिततमं ब्रह्मैवातः मा मिति पदमपि ब्रह्मपरम्– 'इन्द्रोमायाभिः पुरुरूप ईयते" इति श्रुताविन्द्रपदस्य ब्रह्मार्थकतायाः श्रौतत्वात् । प्रेक्षावद्भिः मायया प्रवहमाणे प्रपञ्चे सूक्ष्मेक्षिकया पर्यालोच्यमाने क्रमेणात्मतत्त्वमेव सर्वोत्कृष्टं तत्त्वमाभाति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

४. आत्मवादचर्चा

तस्य कैश्चनाणुत्वं, कैश्चनव्योमरूपत्वं, कैश्चिद्विभुत्वमुपेयते। विभुत्वेऽपि कैश्चिदचिन्त्यत्वं, चित्परिणामित्वम् चिदचित्त्वमपरैश्च चिद्रूपत्वमसङ्गत्वञ्चोच्यते। तत्राप्यन्यैः कस्यचिदात्मविशेषस्य क्लेशकर्मविपाकाशयैरपरामृष्टस्य नित्यशुद्धमुक्तस्वभावत्वम् सर्वज्ञत्वं सर्वशक्तिमत्त्वञ्चाभ्युपगम्यते।

यद्यप्यत्रैव सद्वितीयत्वं चिदचिद्विशिष्टत्वम् चिदचिद्भिन्नाभिन्नत्वं तत्रापि स्वाभाविकोपाधिकाचिन्त्यभेदाभेदपक्षाः शुद्धाद्वैतपक्षाश्च भवन्ति तथापि सर्वविधभेदशून्यं यत्स्वप्रकाशं ज्ञानं तदेव तत्त्वमिति तत्त्वविदो वदन्ति–

"वदन्ति तत्तत्वविदस्तत्त्वं यज्ज्ञानमद्वयम्।
ब्रह्मेति परमात्मेति भगवानिति शब्द्यते॥"

(श्रीमद्भगवद्गीता १,२।११)

इति व्यासोक्तेः। तदेवाद्वितीयत्वेन त्रिविधपरिच्छेदशून्यत्वेनानन्त्यम् ज्ञानत्वादवेद्यत्वेसत्यपरोक्षत्वात्स्वप्रकाशम् अद्वितीयत्वादेव सर्वोपद्रव विवर्जितत्वात् परमानन्दरूपं त्रिकालाबाध्यत्वात् परमसत्यञ्च। तदेवानतिशयबृहत्वाद् ब्रह्मात्मनामप्यात्मत्वेन परमात्मा, अचिन्त्यानन्ततमैः कल्याणगुणगणैश्च सेव्यमानो भगवानित्युच्यते।

ननु ब्रह्मतायां ज्योतीरूपतया एतस्यामूर्त्तत्वम् भगवत्तायाञ्च ज्योतिष्मत्त्वेन मूर्तता प्राकृतगुणराहित्येन निर्विशेषता, अप्राकृतानन्तगुणगणाकरतया सविशेषतैवेति चेन्न। "तत्त्वं यज्ज्ञानमद्वयम्" इति तत्त्वलक्षणस्यैकविधत्वेन तदनुपपत्ते। एतेन किरणादित्यवद्ब्रह्मभगवतोभेदः, कृष्णादित्यस्य किरणरूपं ब्रह्मेत्यादि कथनानि भावमात्रमूलकानि न तु तत्त्वानुसारीणीत्यवगन्तव्यम्। "अथातो ब्रह्मजिज्ञासा" इति ब्रह्मसूत्रेऽपि तस्यैव विचार्यत्वेन तस्यैवोपनिषदत्वेनेतरेषामनौपनिषदत्वेनश्रौतत्वात्।

"एकमेवाद्वितीयम्" इति त्रिविधभेदनिषेधिकाश्रुतिः स्वगतमपि भेदं निषेधत्येव। "सदेव सोम्येदमग्र आसीत्" इति श्रुताविदमर्थस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सदात्मकत्वावधारणेऽपि एकं एवाद्धितीयमिति विशेषणत्रयोपादानं त्रिविधभेदवारणायैव, अतथात्वाङ्गीकारेऽनर्थक्यापत्तेः । एवमेव "नेह नानास्ति किञ्चन" "नात्र काचन भिदास्ति" इति श्रुत्यो किञ्चनकाचन-शब्दाभ्यां नानाभिदादिपदव्यवहृतस्य सर्वविधस्यैव भेदस्य निषेधः । "नात्रकश्चनघटः" इत्युक्तौ घटत्वावच्छिन्नप्रतियोगिताकस्यैव निषेधस्या-वगमदर्शनात् । अप्राकृतगुणसत्त्वेऽपि प्राकृतकाव्यराहित्यमात्रेण काव्य-त्वाभिधाने निष्क्रियत्वाव्रणत्वादिपदानामपि सार्थकत्वोपपत्तिः । न च तत्र सगुणत्वादिश्रवण विशिष्यते सक्रियत्वादिश्रवणस्यापि सत्त्वे तदनु-पपत्तेः । तथा चानिर्वाच्याचिन्त्यदिव्यलीलाशक्त्याऽप्राकृतदिव्यगुणा-द्यङ्गीकारेणैव निर्गुणस्य निरलङ्कारस्य च सगुणत्वसालङ्कारत्वाद्यु-पपत्तिः ।

न च सधनस्य धननिरपेक्षत्वेऽपि निर्धनस्य निरपेक्षानुपपत्तिवत् सगुणस्य गुणनिरपेक्षत्वेऽपि निर्गुणस्य गुणानपेक्षतानुपपत्तिः, निरलङ्कार-स्यालङ्कारनिरपेक्षत्वेऽपि निरलङ्कारस्यालङ्कारानपेक्षतानुपपत्तिरिति-वाच्यम्, गुणादिकृत्याभावेन तदुपपत्तेः । निर्धनस्य निर्गुणस्य निरलङ्का-रस्य भवत्यपेक्षा । ब्रह्मणि परमात्मनि भगवति महत्त्वातिशयाधाय-कत्वेनानन्दातिशयाधायकत्वेन वानर्थ निबर्हकत्वेन वा गुणानां नोप-योगः । तस्य निरतिशय बृहत्वेन निरतिशयानन्दानन्दमयत्वेन नित्य-निरस्तसमस्तानर्थसत्ताकत्वाच्च नेतो गुणालङ्कारोपयोगः । अतएवा-प्राकृतरसानन्दसुधासमुद्रे भगवति गुणकृत्याभावेनालङ्कारकृत्याभावेन निर्गुणोऽपि निरपेक्ष एव ।

यत्तु निराकारस्य निर्गुणस्य प्रेमानास्पदत्वमुक्तं तदबोधविजृम्भि-तम् परमाभिमतसगुणसारप्रातिसुखस्यापि निराकारत्वेऽपि सत्यपि प्रेमा-स्पदत्वदर्शनात् । अप्राकृतरसस्वरूप भगवन्तनिर्गुणं निरलङ्कारं निरपेक्षं गुणा अलङ्काराश्च स्वगुणत्वालङ्कारत्व निष्पत्तये भजन्ति । यथा [illegible]तु-भमणेरधिभूषणाय दत्तोऽप्यसतुष्ट इव स तानङ्गीकरोति न कण्ठ[illegible]य, एवमेव गुणानां गुणत्वायेव तत्तपस्तुष्ट इव तानंगीकरोति तु स्वस्य सगुणत्वायानर्थनिवर्हणाय, महत्वातिशयानन्दातिशयाधानाय वा । तदुक्तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भगवता व्यासेन–

"विस्मापनं स्वस्य च सौभगर्द्धेः
परं पदं भूषणभूषणाङ्गम् ।।"

तस्य सकलकाव्यतात्पर्यविषयीभूतस्याशेषविशेषातीतस्य निर्गुणस्य निराकारस्यात एव निरलङ्कारस्याचिन्त्यशक्त्यानन्तकल्याणगुणगणाकरस्यानन्तकोटिकन्दर्पसुन्दरस्य, शक्रशतकोटिविलासस्य नभः शतकोटिविस्तरस्य वायुशतकोटिविपुलबलस्य रविशतकोटिप्रखरप्रकाशस्य शशिशतकोटिसुशीतलस्य कालशतकोटिदुस्तरस्यामितकोटितीर्थपावनाभिधानस्य मेरुशतकोटिनिश्चलस्य सिन्धुशतकोटिगम्भीरस्य कामधेनुशतकोटिकामपूरकस्य शारदाशतकोटिचतुरस्य विधिशतकोटिसृष्टिनिपुणस्य हरिशतकोटिपालकस्य हरशतकोटिसंहारकस्य धनदशतकोटिसमैश्वर्यस्य । मायाकोटिशतदुर्घटनाघटनापरीयसः शेषशतकोटिधारकस्याप्राकृतस्य रसामृतसिन्धोरनुपमत्वमेव ।'

वस्तुतस्तु यथा शतकोटिखद्योतैरपि नादित्यस्योपमेयत्वं तथैवानन्तकोट्यादित्यैरपि प्रकाशप्रखर्यादौ तस्य नोपमेयत्वं सम्भवति । तत एवाशेषविशेषातीतस्यानन्तकल्याणगुणार्णवस्य, रसो वै सः" श्रुति स्वारस्यसिद्धस्य चित्तत्त्वस्यैव महाकवितात्पर्यविषयीभूतत्त्वमपि तदुक्तं विश्वनाथेनापि–

"सत्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः,
वेद्यान्तरस्पर्शशून्यः– ।

तस्यैव सर्वकाव्यशास्त्रतात्पर्यविषयस्य कर्मोपासनतत्त्वज्ञानादिसमाराध्यस्यैव मुक्तोपसृतत्वमप्युक्तम् । अत एव–

"काव्यालापाश्च ये केचिद्गीतकान्यखिलानि च ।
शब्दमूर्तिधरस्यैते विष्णोरंशाः महात्मनः

वेदोपनिषदादिभिर्विविधतर्कमीमांसाद्युपबृंहितैः प्रमितमेव तत्त्वं राधाकृष्ण–सीताराम, कामेश्वरकामेश्वरी, नल–दमयन्ती रूपवर्णाश्रमा-

---

१. भक्तिरसार्णव ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चारशीलस्वधर्मपालनपराणां श्रुतिपुराणाद्युक्तानां रामायण–महाभारतादावुपवृंहितानामेव चरित्राणां वर्णनं कान्तासम्मितैरपि काव्यनाटकवाक्यैः कविभिः क्रियते न तु निर्मूलं किञ्चित् । उपनिषदां वेदानां स्मृति–पुराण–रामायण–महाभारतादीनां कालनिर्धारणमपि दुरभिसन्धिमूलकमेव । "वाचा विरूप नित्यया" "अनादि निधना" इत्यादिभिः श्रुति–स्मृतिपुराणानां नित्यत्वावधारणात् । पुराणादीनामितिहासादीनामपि विश्वसितत्वेन नित्यत्वाङ्गीकारात् ज्ञातकर्तृत्वे पौरुषेयत्वस्याप्रमीयमाणकर्तृत्वेनापौरुषेयत्वात् मन्त्रब्राह्मणयोश्च वेदत्वात् ।

द्वयोरेकीकरणं साहित्यम् तत्रैव परमानन्दलाभः । तत्र च सहजं प्रेमैव सर्वोत्कृष्टं सार्वत्रिकं साधनं । तथापि सत्वप्रधानो मनुश्य एव सहजकारको भवति । तत्रैव सहजप्रेमप्राखर्यं व्यज्यते । तेन वस्तुभूतं मनुष्यत्वं व्यक्तीभवति । मनुष्यस्य तादृश स्वरूपमेव सत्वम् । बहिर्मुखं जीवनं बाह्यरूपम् । स्वरूपमाध्यात्मिकम् । रूपमपहाय स्वरूपेऽवस्थानमेवमोक्षः । रूपेऽवस्थानं बन्धः ।

मेघदूतस्याप्यत्रैव तात्पर्यम् । जीवपक्षस्यात्मको निवासः स्वरूपनिवासः । शापवशात्ततोऽन्यत्र निवासः । ततः प्रत्यागमनम् । पुनः स्वरूपावस्थानम् । स एव मोक्षः । रघुवंशकुमार–सम्भवादीनामपि इदमेव परमतात्पर्यम् ।

प्रकृतिरेव नारी "सैव रति–राधा–सीता–गौरीन्दुमती–सरस्वती–कृष्णा–रम्भा–दमयन्त्यादिशब्दव्यपदेश्या । कामः पुरुष एव राम–कृष्ण–शिव–विष्णु–रघु–दशरथादिशब्दैर्लोकेऽपि वेदेऽपि च व्यपदिश्यते । यदाह भगवतीश्रुतिः–

"स हैतावानास, यथा स्त्रीपुंमांसौपरिष्वक्तौ, स स्वयमेवात्मानं द्वेधा अपातयत्, ततः पतिश्च पत्नी चा भवताम्" इति । मनुरपि तदेवोपवृंह्यन्नाह–

द्विधाकृत्वात्मनोदेहमर्धेन पुरुषोऽभवत् ।
अर्द्धेन तस्यां नारी स विराजमसृजद्विभुः ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तयो: प्रकृतिपुरुषतयाभिमतयोस्तादात्म्यमेव साहित्यम्, तदेव रस-निष्पादकं तत्त्वम् । "रसो वै स:" "विभावानुभावव्यभिचारि संयोगात् रस निष्पत्ति:" इति श्रुतिस्मृतिभ्यां व्यक्तं सकलसत्काव्यतात्पर्यविषीय-भूतं सर्वप्राणिपरप्रेमास्पदं ब्रह्मात्मतत्त्वमेव, यल्लब्ध्वा आनन्दीभवन्ति सहृदया: ।

५. शास्त्रप्रामाण्यवाद:

वाल्मीकि–भरत–भागुरि–व्यास–भास–कालिदास–माघ–हर्ष–दण्डि– भामहा– नन्दवर्धनाभिनवगुप्तधनिक– धनञ्जय– शारदातनय–मम्मटविश्वनाथजगन्नाथ–प्रभृतीनां श्रुतीतिहासस्मृतिपुराणतन्त्रादिषु प्रामाण्यबुद्धिख्याता, अथर्ववेदमन्त्रेषु वृहदारण्यकादिषु उपनिषद्भाष्येषु न्यायभाष्यादिषु चेतिहासपुराणानामपि प्रमाणत्वेन वर्णितत्वात् । श्रुति-स्मृत्योनेत्ररूपत्वं पुराणानाञ्च हृदयरूपत्वमुक्तम्– "पुराणहीनाद् हृच्छू-न्यात् काणान्धावपि तौ वरम्" इति । हृदयस्य सत्वेऽपि नेत्राभावे गतिरस्ति । हृदयाभावे तु ते निरर्थके भवत: । बौद्धजातकेषु अश्वघोष-कृतबुद्धचरिते च पुराणवर्णितानां व्यक्तिविशेषाणाञ्च तच्चरित्राणां बाहुल्ये नोपलम्भात्, पुराणाभावे तेषामपि निर्मूलत्वमेव भज्यते ।

६. मीमांसाशैली

वस्तुतस्तु वेदभाष्यभूतान्येवेतिहासपुराणादीनि । सत्काव्यत्वव्यव-हारेऽपि तदेव मानम् । तस्मात् श्रुतिस्मृतीतिहासपुराणतन्त्राणां समन्वये-नैव धर्मब्रह्मस्वरूपं कवय: संगिरन्ते । तेन यथा मन्त्रब्राह्मणात्मकस्य वेदस्यानादित्वेन तासां तासां व्यक्तीनां देशग्रामादितद्घटनानाञ्च प्रति-पादकत्वेपि न तैस्तस्य कालविशेषनिर्धारणं कर्तु शक्यम् वैदिकशब्दानां नित्यत्वेन घटनापूर्वकत्वाभावात् ।

लौकिकानि पुस्तकानि घटनापूर्वकाणि भवन्ति । वेदस्तु घटना-पूर्वको भवति । घटनानामेव वैदिकशब्दपूर्वकत्वात् । तदपि भगवता व्यासेनेनैवोक्तम्–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

"शब्द इति चेन्नातः प्रभवात् प्रत्यक्षानुमानाभ्याम्"

(ब्र. सू. १।३।२८)

"स भू रिति व्याहरत् । भुवमसृजत्" ।

"सर्वेषां तु स नामानि कर्माणि च पृथक् ।

वेदशब्देभ्य एवादौ पृथक्संस्थाश्च निर्ममे" ।।

(मनुस्मृतिः १।२१)

इत्यादिश्रुतिस्मृतिपूर्वकत्वमेव सृष्टेरुक्तम् । श्लिष्यते चैतत् । यथा कुलालादिस्तैस्तैः शब्दांस्तान्घटादीन् मनसालोच्यैव दण्डचक्रादिभिस्तान्निर्माति, तथैवेश्वरोऽपि कैश्चिच्छब्दैस्तांस्तानर्थान् विचिन्त्यैव निर्माति– "जानाति इच्छति अथ करोति" इति नियमम् । तदुक्तम्–

ज्ञानजन्याभवेदिच्छा इच्छाजन्याकृतिर्भवेत् ।

कृतिजन्याभवेच्चेष्टा चेष्टाजन्यं फलं लभेत् ।।

ज्ञानञ्च शब्दानुबिद्धमेव जायते–

"नसोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।

अनुविद्धमिवज्ञानं सर्वं शब्देन भासते" ।।

इति वाक्यपदीयकृदुक्तेश्च । तेनेतिहासपुराणादिषुकेषाञ्चिन्नगर-व्यक्ति-नद्यादीनां काकतालीयन्यायेन नामोपलम्भादेव पुराणादिकाल-निर्धारणं भ्रान्तिमूलकमेव । वेदमूलत्वेन ऋषिज्ञानमूलकत्वेन वा तत्तद्वर्णनस्योपपन्नत्वात् । वाल्मीकिरामायणेभाविरामचरित्रवर्णनवदादावेव वेदपुराणादौ तद्वर्णनसम्भवंतथोक्तत्वात् ।

यथा ब्रह्मसूत्रतद्भाष्यादिषु श्रुतिस्मृत्यादिसमन्वयेनैव ब्रह्मस्वरूप-मुपवर्ण्यते, मिताक्षराव्यवहारमयूखदायभागहेमाद्रि–पराशरमाधवीय-निर्णयसिन्ध्वादिषु धर्मव्रतप्रायश्चित्तादिकं निर्णीयते, मनुकात्यायनापस्तम्बात्रिपराशर–याज्ञवल्क्य–हारीतार्षितदेवलगौतमविष्णूशनोऽङ्गिरोव-शिष्ठादि प्रोक्तस्मृतिसंहिताभिरेव राजकीयदण्डादिनिर्णयस्तथैव वेदोपनिषद्रामायण महाभारताग्नि–विष्णु–भागवत–बृहत्कथादिभिरपि साहित्यशास्त्र नियमन्यायानां स्वरूपमुपवर्णितमास्ते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वाल्मीकि–भरत–व्यासभासकालिदास–भवभूति–दण्डि–भामह–वामनादीनां ग्रन्थान् पर्यालोच्यैव साहित्यशास्त्रेऽपि समन्वयात्मिकया प्रक्रियया काव्यानां सदसदात्मत्वं निर्णेतुं शक्यते । उभाभ्यामपि विष्णवग्निपुराणयोरुक्तानामलङ्काराणामाधारेणैवालङ्काराः निरूपिताः । पुराणेषु लक्षणान्यन्यत्र प्रोक्तानि, लक्ष्याण्यन्यत्र । पुराणेषूक्तानामलङ्काराणां रासपञ्चाध्यायीप्रभृतिषु स्थलेषु लक्षणाभिज्ञानपूर्वकं समन्वयः विद्वद्भिः करणीयः । पुराणाद्याश्रयेणैव काव्यं लेख्यमिति कविसम्प्रदायः ।

न हि सर्वेषां वस्तूनां सर्वत्र वर्णनं सम्भवति, तथात्वे एकेनैव गतार्थत्वाऽन्यस्य वैयर्थ्यापातात् । यथा गुणोपसंघटनन्ययेन मीमांसाप्रणाल्या पूर्वापरविरोधपरिहारपूर्वकं समन्वयो भवति, सैव साहित्यशास्त्रीयनियमन्यायमीमांसासरणिरपि । आनन्दवर्धनाचार्येणापि ध्वन्यालोके स्वस्मात्पूर्वभाविनामाचार्याणां मतसारसंग्रहपूर्वकं रामायण–महाभारत–नाट्यशास्त्र, महाकाव्यादिलक्ष्याणां समन्वयपूर्वकमेव काव्यालोचनाया सिद्धान्तः प्रत्यपादि । तन्मतानुसारेण, द्वित्राः पञ्चषाः एव महाकवयः, द्वित्राणि पञ्चषानिच महाकाव्यानि । भारवि–माघ–हर्ष–महाकविविरचितानि महाकाव्यानि, भट्टनारायणस्य वेणीसंहारः प्राकृतानि च काव्यानि ध्वनिकारोत्तरवर्त्तिनां साहित्यसम्प्रदायाचार्याणां आदर्शभूतानि । तदनुद्धरणं न तदसत्वे तत्त्वं भवति, अनुपलम्भेनापि असत्वस्यासिद्धत्वात् । सतामपि पदार्थानामनुपलम्भादर्थवाच्यैव ।

७. विकासमतखण्डनम्

यदि साहित्यिकक्षेत्रेधार्मिकक्षेत्रे च विकासवादनीत्या कविकल्पनाप्रसूतमेव गुणालङ्कार–रस–रीतितत्त्वं रामकृष्णादि तत्त्वञ्च विकासमुपगतम् तदा परां कोटिमुपगताऽपि कल्पनाकल्पनैव, वस्तुशून्यत्वात् । तस्मात्प्राकृतसाहित्यात् संस्कृतसाहित्ये ततश्चोपासनाक्षेत्रेऽवतीर्णत्वादिकल्पनानामवैज्ञानिकत्वेनातन्त्रत्वात् । दार्शनिकैरागिभिश्च वस्तुतत्वमेव परिष्कृत्य प्रदर्श्यते, ना भूतम् । तदेव कार्कैर्नाटकैश्चापिकान्तासम्मितैरपि वाक्यैरूपवर्ण्यते न तु निर्मूलम । श्रीमद्भागवते–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

"स वा अयं सख्यनुगीतसत्कथो,
वेदेषु गुह्येषु च गुह्यवादिभिः ।"

इत्यादिना गुह्येषु वेदेषुः कथा अवर्णिताः गुह्यवादिभिरेव ताः विज्ञायोद्घाटयन्ते । अत एव श्रुतिस्मृति-पुराणेतिहासकाव्यनाटकेषु तदेवाप्राकृतं रसाख्यं प्रसिद्धं तत्त्वमाख्यायते । एवं सर्वस्यापि वैदिक-सूत्रेणतस्य निरतिशयानन्दरूपे शक्त्यधिष्ठिते परब्रह्मण्येव तात्पर्यम् । तदेव च स्थावरजङ्गमात्मके जगति कामेश्वरी–काम–सीताराम राधा-कृष्णादि रूपेण च नैकरूपं रसतत्त्वं विलसतीति एष निष्कण्टको राजमार्गः ।

८. काव्यानन्दविमर्शः

"रसो वै सः" इति श्रुत्या रसस्य ब्रह्मरूपता प्रोक्ता । तस्यावेद्यत्वे सत्यपरोक्षत्वेन स्वप्रकाशत्वमेव । सहृदयानां नाट्यदर्शिनां प्रत्यक्ष-विषयतापि भवति । "आत्मनस्तु कामायसर्वं प्रियं भवति" इति श्रुत्या निरतिशयपरप्रेमास्पदत्वेनात्मनः परमानन्दरूपत्वमनुमातुं शक्यते । तस्यैव च रसात्मकतया तदभिन्नाभिमानस्य रसस्याप्यनुमेयत्वं सुश-कमेव । तत्र कालान्तरेच्छाधीनेच्छाविषयत्वेन सोपाधिकप्रेमास्पदत्वेन पुरुषार्थस्य गौणत्वं, तदनधीनेच्छाविषयत्वेन मुख्यत्वम् । तत्त्वञ्च निरतिशयानन्दस्वरूपात्मन्येव पर्यवस्यति । रसशास्त्राचार्यैस्तु प्राकृता-धिकारिणां प्राकृतरसपरिचयद्वारेणाप्राकृतरसे चैतोऽवतारायाप्राकृत रस एवोपवर्णितः । प्रयोजन पार्थक्यं प्रस्थानपार्थक्यं प्रयोजयत्येव । ये च संसारचङ्क्रमणशीला अपरिशीलितपरमपुरुषार्थरीतयः सुकुमारमतयो विविधवासनावासितान्तः करणाः, सहृदयास्तान्–

"उपायाः शिक्षमाणानां बालानामुपलालनाः ।
असत्येवर्त्मनिस्थित्वाततः सत्यं समीहते" ।।

इति न्यायात् अप्राकृते रसे प्रवर्त्तयितुं रसाचार्याः गुडाजीविकान्यायेन प्राकृतं रसमास्वादयन्ति । परमरसास्वादलेशोऽपि यावन्नानुभव-गोचरीकार्येत तावत्ते कथं दिव्यरसस्पृहयालवोऽपि क्रियेरन् । सः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्राकृतो रस एव "काव्यरसः" स च ब्रह्मानन्दसहोदरः। अप्राकृतरसस्तु "भाव" इत्याख्यायते। स एव च भक्तिरसः। व्यासेन, भक्तेः रसत्वं श्रीमद्भागवते, शान्तस्य च महाभारते हरिवंशपर्वणि रसत्वं व्यवस्थापितम्। श्रीमदानन्दवर्धनाचार्यैस्तथैव ध्वन्यालोकस्य तुरीयोद्योते निर्णीतम्। भावे रसे च रसत्वव्यपदेशहेतोस्तादृशानन्दात्मकताया उभयत्र सत्वात्।

सात्विकमनोवृत्तिरूपं सुखवृत्तिप्रतिबिम्बितसुखाभास रूपमेव तु सुखं तैस्तैराचार्यैर्हेयत्वेनाभिमतम्। तस्य परमानन्दात्मत्वाभावेन परिणामतापसंस्कारदुःखाद्यावृतत्वात्। तदात्मनः चार्वाक-बौद्ध-जैन-तार्किक वैशेषिक सांख्य–योगादि रीत्या परमानन्दरूपत्वमुपपादयितुमशक्यम्। आद्ययोरात्मभङ्गुरत्वेन, तृतीयस्य कथञ्चिन्नित्यत्वेऽपि अनानन्दरूपत्वे नान्येषां रीत्या नित्यत्वेपि रसात्मकत्वाभावेन तदनुपपत्तेः। द्वैतविशिष्टाद्वैत–द्वैताद्वैत–शुद्धाद्वैताद्वैतपर्यवसानानामौपनिषदानां तु नित्यत्वमानन्दरूपत्वञ्च सम्प्रतिपन्नमेव रसस्वरूपो भगवानेव रसः। तस्यांशो जीवोऽपि सिन्धोर्विन्दुरिव तत्स्वभाव एव। प्राकृताप्राकृतालम्बनयोः तयो रसयोः प्राकृतत्वाप्राकृतत्वव्यहारः।

यद्यपि प्राकृतरसापेक्षयाऽप्राकृतरसस्य महद्वैलक्षण्यं खद्योतमार्तण्डादिदृष्टान्तैः "मधुसूदनसरस्वती" महानुभावैरुक्तमेव तथापि तत्प्राकृता, प्राकृतालम्बनभेदमूलकत्वाभिप्रायेणैव योजनीयम्। रसाभिव्यक्ति प्रकारस्तु साहित्यशास्त्रीय एव। तथा च तैत्तिरीयोपनिषदि (७ अनु.) उक्तम्–

"असद्वा इदमग्रआसीत् ततो वै सदाजायत।
तदात्मानं स्वयमकुरुत। तस्मात् सुकृतमुच्यते।"

अर्थात् सर्वकारणस्य परमात्मनो जगदुत्पत्तेः प्राक् अनुत्पन्ननामरूपत्वेन व्यवहारानर्हत्वात् असद्रूपत्वम्। तत एव सतैर्व्यवहारार्हस्य जगदुत्पत्तिरुक्ता। नात्र "पितुः पुत्र इव ब्रह्मणो विभक्तं जगत्" इति द्योतयितुं तद् ब्रह्म आत्मानं सच्चिदानन्दैकरसस्वपं स्वयं कर्त्रन्तर नैरपेक्ष्येणाकुरुत, जगदाकारेण कृतवानित्युक्तम्, तद्भिन्नस्य निमित्तोपादाना-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

देरभावात् । तस्मात् स्वयं कर्तृत्वादेव "ब्रह्म सुकृतम्" उच्यते । जीवास्तु न स्वयं कर्तारः, अन्तर्यामिप्रेरिता एव कुर्वन्ति ।

"यद्वैतत्सुकृतम् । रसो वै सः । रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति ।"

यद्वै पूर्वोक्तं सुकृतपदाभिलप्यं ब्रह्म स ब्रह्मपदार्थः रस एव लोके तृप्तिलक्षणस्य आनन्दस्य हेतुर्मधुराम्लादिपदार्थो रस उच्यते । ब्रह्मापि कृतकृत्यत्वादिलक्षणस्य तत्त्वविदामानन्दस्य हेतुत्वाद्रसो भवति । रसनीयवेदान्तवाक्यजनितमनोवृत्त्यात्मकेन ज्ञानेनास्वाद्यत्वेनापि ब्रह्मणो रसत्वम् ।

प्रीतिपूर्वकं रसग्रहणमास्वादः । प्रीतिश्चानन्दमन्तरानैव सम्भवति । तस्मात् "रस पदेन ब्रह्मानन्दरूपत्वमुच्यते । तेन निरतिशयनिरुपाधिकपरप्रेमास्पदत्वेन ब्रह्मणोरसत्वं निरुपचरितमेव अत एव" अयं तत्त्ववित् पुरुष रसं लब्ध्वा साक्षात्कृत्यधन्योस्मि—इत्येवमानन्दवान् भवति, आत्मलाभान्नपरं विद्यते । तस्मात्तद्वत् परितोष हेतुत्वाद् ब्रह्मणो रसरूपता ।

"कोह्येवान्यान् कः प्राण्यात् यदेष आकाश
आनन्दो न स्यात् । एष ह्येवानन्दयति ।"

इत्यादि श्रुतेः वैषयिकानन्दहेतुत्वादपि ब्रह्मणो रसरूपता । यदि हृद्व्योमगतोऽयं परमात्मस्वरूपानन्दो न स्यात्तदा कोवागादिभिरिन्द्रियैश्चेष्टेत ? को वा प्राणेन श्वासादिकं कर्मकुर्यात् । "एष हि द्रष्टास्प्रष्टाघ्राता रसयिता मन्ताबोद्धा विज्ञानात्मा पुरुषः इति श्रुतेः प्राणाद्यात्मभावमयपा श्रुत्या रसरूपस्य परमात्मन एवात्मत्वं प्रकाश्यते । "यः प्राणेन प्राणिति सत आत्मा सर्वान्तरः" इति श्रुतेश्च । यद्यपि असङ्गस्य चेष्टादिकर्तृत्वं न सम्भवति, तथापि विज्ञानमयकोशोपाध्यवच्छिन्नस्य तस्य तत्सम्भवत्येव ।

स एवानन्दरूपो भगवान् सर्वान् प्राणीन् आनन्दयति, परितोषयति, अभीष्टविषयलाभे मनोविषयाभिमुखतां परित्यज्य विषयान्तरा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भिलाषोदयात्पूर्वमन्तर्मुखं तत्प्रत्ययानन्दमनुभवति । सोऽयमेव विषयानन्दः उच्यते ।

"सैषाऽनन्दस्यमीमांसा भवति । युवा स्यात् साधुयुवाऽध्यापकः । आशिष्टो द्रढिष्ठो बलिष्ठः । तस्यैयं पृथिवी सर्वायित्तस्य पूर्णा स्यात् । स एको मानुष आनन्दः ।"

इत्येवमादिरूपेण तैत्तिरीये (ब्रह्मवल्ली ८), अन्यत्र च प्रस्तुता ।

अविद्यया विवेकस्य तिरस्कृतत्वेनाविद्याऽचोत्कृष्यमाणायां हिरण्यगर्भमारभ्यमनुष्यपर्यन्तेषु जीवेषु ब्रह्मानन्दस्तत्कर्मवशाद् विषयापि साधनसम्बन्धवशाच्च यथाविज्ञानं भाव्यमनोगतया अपेक्षीयमाणो भवति । स एव विद्याकर्मप्रकर्षेण गन्धर्वादिषु हिरण्यगर्भपर्यन्तमुत्तरोत्तरं शतगुणोत्कर्षयुक्तोऽकामहतविद्वच्छ्रोत्रियप्रत्यक्षो विभाव्यते । ब्रह्मविद्यापनीयायामविद्यायां स्वाभाविकः परिपूर्णः परमानन्दोऽपरिच्छिन्नोऽवतिष्ठते ।

तेन "रसो वै सः" इत्यादिना निर्विशेषः, सविशेषश्च रसो निरुच्यते । निर्विशेषो रसस्तु कूटस्थोऽनाद्यनन्तैकरसः, द्वितीयस्तु तत्तदुपाधिशुद्धि तारतम्यजनित–तारतम्योपेतः । नीरसमिदं जगत् रसरूपेण ब्रह्मणा सरसम्, स्फूर्ति रूपेण तेनैव स्फूर्तिमत् सद्रूपेण च तेन सत्तावदुच्यते । सर्वसाधनसम्पन्नमनुष्यादि ब्रह्मपर्यन्तभोग्याः सर्वेऽप्यानन्दाः यत्रैक्यमासादयन्ति तथाऽकामहतत्वञ्च यत्र परां निष्ठां प्रपद्यते, स एवानन्दो मुख्यो रसः ।

९. मतान्तरोन्मूलनम्

कैश्चित्तु– "प्रेमहितादि–पदव्यपदेश्यं नित्यक्रीडापरायणमेकमेव तत्त्वं विविधक्रीडाविशिष्टरसरूपेणाभिव्यज्यते । तस्यैव सख्यवात्सल्यादिरूपेण रसराजशृङ्गाररूपेणाप्यभिव्यक्तिः । शृङ्गारस्य रतिः स्थायीभावः । तस्या एव विवर्त्तभूताः अन्ये स्थायिभावाः । लौकिकः कामभाव एव काव्येषु सत्प्रतिभाजन्येन विभावनाख्येन व्यापारविशेषेण सर्वरसिकवेद्यालौकिकशृङ्गारादिरूपेण व्यपदिश्यते । लोके एषां कामचेष्टानां वर्ण-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नेनापि जुगुप्सा भवति, तासामेव काव्यनाट्यादिषु सत्कविनिबद्धत्वेनालौकिकरसाभिव्यञ्जकत्वं निष्पद्यते । लौकिकस्य रसस्य येषां कार्यकारणसहकारिणां योगेन निष्पत्तिर्भवति तेषामेव काव्यादिषु विभावानुभावव्यभिचारिभावव्यपदेश्यतास्ति । सहृदयानुभवाधारेणैव तस्य स्वप्रकाशचिन्मयाऽखण्डब्रह्मसहोदरत्वमुच्यते, स्वीक्रियते च । तथापि तस्य रसस्य संवेदनपूर्वकालयोरसत्वेन क्षणिकत्वमेव । तस्य कृत्रिमव्यापारेण विभावनाख्येन साधारणीकरणापरपर्यायेन सत्कविलोकोत्तरप्रतिभाजन्यत्वेनाभिव्यज्यमानत्वादेव क्षणिकत्वम् । व्यापारस्य तस्यालौकिकत्वेऽपि प्रतिभाजन्यत्वेन कृतिमत्वमेव विभावानुभावादिभिस्तदभिव्यञ्जनमपितत्कृत्रिमत्वप्रयोजकम् । इत्थं लौकिकरसस्य व्यक्तिगतत्वे, लौकिकत्वे च सत्यपि काव्यरसस्य अवर्णनीयमलौकिकत्वं यद्यपि भवति, तथाप्यनित्यत्वं कृत्रिमत्वञ्चापरिहरणीयमेव । विस्तरस्तु काव्यरसनिरूपणावसरे वक्ष्यामः ।

१०. श्रीकृष्णद्वैपायनमतम्

भगवता व्यासेनापि अग्निपुराणे निर्विशेषसविशेषभेदेन रसस्य द्वैविध्यमुक्तम् । तत्र निर्विशेषो यथा–

> "अक्षरं परमं ब्रह्म सनातनमजं विभुम् ।
> वेदान्तेषु वदन्त्येके चैतन्यं ज्योतिरीश्वरम् ।।
> आनन्दः सहजस्तस्य व्यज्यते स कदाचन ।
> व्यक्तिः सा तस्य चैतन्यचमत्कारसमाह्वया ।।

इतिहासपुराणान्येव वेदस्य मुख्यं व्याख्यानम् "तेन रसो वै सः" प्रभृतीनां श्रुतिनामग्निपुराणे विशदव्याख्यानमस्ति । पूर्वं निर्विकारब्रह्मज्योतिरसत्वेन निरूपितम् । उत्तरत्र काव्यादि प्रसिद्धसविशेषरस निरूपणं शृङ्गारादिभेदाश्च तत्रैव निरूपिताः पिङ्गलाद्यनुसारेण छन्दसामिव काव्यनाटकादीनामपि भगवता व्यासेनैव निरूपणं कृतम् । विविधानि नृत्यगीतादिगताङ्गकर्माणि नानाविधा अभिनयाः शब्दार्थालङ्काराः, उभयालङ्काराः काव्यगुणा, तद्दोषा अपि तत्रैवोक्ताः । विष्णु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुराणेऽपि तेनैव काव्याङ्गानां निरूपणानि कृतानि । पौराणिकस्तोत्रेषु भगवतो व्यासस्य कवित्वशक्तिरपि व्यक्तीभवति ।

भरतमुनिनापि श्रुतिस्मृतिपुराणादि मूलकमेव रसशास्त्रं व्याख्यातम् । "असत्वेवर्त्मनि स्थित्वा" इति न्यायेनाप्राकृतसविशेषनिर्विशेषयो चेतोवतावश्यैव प्राकृतरसनिरूपणमपि समञ्जसमेव । लौकिकरसापेक्षया काव्यरसस्य महद्वैलक्षण्यमस्ति कृतिमत्वं तु कार्यमात्रसाधारणम् । असाधारणैः काव्यैरलौकिकरसानुभूतिर्विशिष्यते । अत एव काव्यानां मानवजीवने सदाचारमर्यादाशिक्षणद्वारा कृत्याकृत्यप्रवृत्तिनिवृत्तिशिक्षणेन चतुर्विधपुरुषार्थोपदेशकत्वेन सार्थक्यम् । तदुक्तम् भामहाचार्येण–

धर्मार्थ काममोक्षेषु वैचक्षण्यं कलासु च ।
करोति प्रीतिं कीर्तिञ्च साधुकाव्य निषेवणम् ।।

तेनैव हेतुनाकाव्यस्वरूपमुपवर्णयता विश्वनाथेनापि "वाक्यं रसात्मकं काव्यमि" त्युक्तम् । इत्थं साहित्यशास्त्रेध्वनिसिद्धान्त एव सिद्धान्तः । काव्योपवर्णितविभावादिभिरेव काव्यरसनिर्णयः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ध्वनिसिद्धान्तः

प्राग्वर्तिनामाचार्याणां ग्रन्थानां सम्यगालोचनेन तथ्यमेतद्व्यक्तीभवति यदुपमालङ्काराणाम्, प्रतीयमानस्य चार्थस्य सत्तापि तैः स्वीकृता। काव्येषु गुणालङ्कार–रीतिवृत्तीनां योगात् तस्यचारुत्वनिष्पत्तिर्भवति। अन्येषा काव्यसिद्धान्तानामिव ध्वनिसिद्धान्तस्यापिचर्चा आनन्दवर्धनाचार्यात् प्रागेव सञ्जाता। आनन्दवर्धनेनैव तथ्यमेतत्स्वीकृतम्। "बुधैर्यत्समाम्नातपूर्वः" । वामनतुल्यकालिकेन कविना मनोरथेनाप्युक्तम्–

"यस्मिन्नस्ति न वस्तु किञ्चनमनः प्रह्लादि सालङ्कृतिः
व्युत्पन्नैरचितं न चैव वचनैर्वक्रोक्तिशून्यं च यत्।
काव्यं तद्ध्वनिना समन्वितमिति प्रीत्या प्रशंसञ्जडो,
नो विद्मोभिदधाति किं सुमतिना पृष्टः स्वरूपं ध्वनेः ।।

अर्थात् प्रवादमात्रं ध्वनिः, न त्वस्य क्षोदक्षमं तत्त्वं किञ्चित्। किञ्चालङ्कारगुणरीतिवक्रोक्त्यादिप्रसिद्धप्रस्थानव्यतिरेकिणोऽन्यस्य काव्य प्रकारत्वमेव न सम्भवति। सहृदयहृदयाह्लादिशब्दार्थमयत्वस्यैव काव्यत्वेनोक्तप्रस्थानातिरेकिणोध्वन्याख्यस्य काव्यत्वानङ्गीकारात्। न च तत्समयान्त पातिनः सहृदयान् कांश्चित्परिकल्प्य तत्प्रसिद्धयाध्वनेः काव्यत्वव्यपदेशः प्रवर्त्तितोऽपि सकलविद्वन्मनोग्राहितानवलम्बते। तस्मान्नास्त्येवध्वनिः। शब्दगताश्चाहेतवोऽनुप्रासादयः, अर्थगताश्चोपमादयः, वर्णसंघटनाधर्माश्च माधुर्यादयः, तदनतिरिक्ता उपनागरिकाद्यावृत्तयः, वैदर्भी प्रभृतयो रीतयश्च। तद्व्यतिरिक्तः कोऽयं ध्वनिरिति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवं ध्वनेः काव्यप्रकारत्वमुत्कृष्टतमत्वञ्चापि ध्वन्यालोककर्तृ पूर्वमेव विद्वद्वरिष्ठगोष्ठीगरिमानमवाप। गुणालङ्कारव्यतिरिक्तत्वाभावेन, ध्वन्यभाव इत्यपि ध्वनिविषये चर्चा तदानीमेवाभवत्। गुणालङ्कार व्यतिरिक्तत्वेन ध्वनेरन्त पातितां मन्यमानाः दण्डिभामहवामनादयो "भाक्तवादिनः।"

एवमानन्दवर्धनात्प्रागेवध्वनेः काव्यजीवितत्वं, गुणालङ्कारव्यतिरिक्तत्वम्, गुणालङ्कारातिरिक्तस्य काव्यचारुत्वाप्रयोजकत्वेन तत्समन्वितकाव्यत्वभावश्चेति प्रश्नत्रयमेवानन्दवर्धनस्य ध्वन्यालोकनिर्माणे पृष्ठभूमिभूतम्। तदुक्तं तेनैव–

काव्यस्यात्माध्वनिरितिबुधैर्यः समाम्नातपूर्व
स्तस्याभावं जगदुरपरे भाक्तमाहुस्तमन्ये।
केचिद्वाचां स्थितमविषये तत्त्वमुचुस्तदीयम्,
तेन ब्रूमः सहृदयमनः प्रीतये तत्स्वरूपम्॥

(ध्वन्या० १।)

स एव काव्यात्मत्वेनाभिमतोध्वनिः वाच्य (मूल) प्रतीयमान (मूल) श्च। शब्दशक्तिमूलत्वाद्वाच्यत्वमर्थशक्तिमूलत्वाच्चप्रतीयमानत्वम्। किन्तु–

यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ,
व्यक्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः।

वाच्यप्रतीयमानयोर्द्वयोरप्यर्थयोर्यस्मिन्नर्थविशेषेपर्यवसायित्वं स एवमुक्ताफलविच्छुरितच्छायाप्रतिमः प्रतीयमानोऽर्थः काव्यस्यात्मा। "योऽर्थः सहृदयः श्लाघ्यः", "काव्यस्यात्माध्वनिः" इत्येताभ्यां कटाक्षितः प्रतीयमानोऽर्थः सापेक्षो निरपेक्षश्च। तृतीयकारिकोक्तो यो प्रतीयमानोऽर्थ स एव रसादिरूपः स एव वस्तुतः काव्यस्य सारभूतः। वस्त्वलङ्काररसादिभेदेन स त्रिधा। वस्तुमात्रव्यंग्यत्वे प्रहेलिकादावतिव्याप्तिः अलङ्कारमात्रव्यंग्यत्वे च चित्रत्वमेव। रसादिव्यंयत्वे काव्यत्वव्यवहारः। अतः ध्वनिविशेषः काव्यम्। "शब्दः अर्थः व्यञ्जनाव्यापारः प्रतीयमानोऽर्थः, तैरन्वितं काव्यञ्चेतिध्वनिशब्दार्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१. व्यञ्जना

ध्वनिसर्वस्वभूता व्यञ्जना, काव्यव्यापारविशेषरूपाभिमता । नाटयशास्त्रे महामुनिना भरताचार्येणापि–

"अष्टौ भावाः स्थायिनः ।
त्रयस्त्रिंशद् व्यभिचारिणः ।
अष्टौ सात्विकाः ।
एते काव्यरसाभिव्यक्तिहेतवः ।
काव्यार्थ–संश्रितैर्विभावानुभाव–व्यञ्जितैः ।
एकोनपञ्चाशद्भावैरभिनिष्पद्यन्तेरसाः ।"
"नानाभिनय–व्यञ्जितान् वागङ्गसत्त्वोपेतान् ।
स्थायिभावानास्वादयन्ति सुमनसः ।"

इत्यादि सन्दर्भैः रसाभिव्यक्तिहेतुभूताया व्यञ्जनाया अस्तित्व-ममाति । "सुमन" इति "सहृदया" इति चानर्थान्तरम्–

"चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः"

इति परमप्रमाणिके शब्दकोशेऽमरसिंहेनाप्युक्तम् । तस्य विक्रम-सभानवरत्नेषु गणनाभवति कालिदाससमकालभावित्वमपीति विद्वांसो वदन्ति । रसकाव्यात्मत्वम् व्यञ्जनावृत्या रसाभिव्यक्तिश्चेति भरता-चार्येणैवोक्तमत एव "बुधैर्य समाम्नातपूर्वः" इत्युक्तम् । बुधैरिति भरता-दिभिः न केवलं तै रेवापितु वैयाकरणैरपीति ध्वनिकृतापि सूचितम् । तदनुसारिणा भट्टोद्भटेनापि व्यञ्जनायाः व्यापाररूपताप्युक्ता । तथा हि–

"पर्यायोक्तं यदन्येन प्रकारेणाभिधीयये ।
वाच्यवाचकवृत्तिभ्यां भिन्नेनावगमात्मना ।"

(का. लं. सा. सं.)

लक्षणाया वाच्यवृत्तित्वेनाभिधापुच्छभूतत्वं प्रसिद्धम् । न हि चैवा-भिधान शक्तिः, सैवावगमनशक्तिः । अवगमनमनुमानमेवेति कथनं दुराग्रह-मात्रम् । व्यञ्जनायाः शब्दवृत्तित्वमपि भवतीत्यप्यानन्दवर्धनाचार्येणोक्त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सैव । गुणालङ्काराणां वाच्यवाचकभावप्राणत्वेन ध्वनेः न तयोरन्तर्भावः । प्रत्युत तद्योगादेवालङ्काराणां गुणानाञ्च तत्त्वम् । काव्ये शब्दार्थयोरपि रसाद्यानुगुण्येनैव व्यवहारः । एवञ्च–

व्यंग्यव्यञ्जकसम्बधनिबन्धनतया ध्वनेः ।
वाच्यवाचकचारुत्वहेत्वन्तः पातिता कुतः ?

विद्वांसो वैयाकरणाः श्रूयमाणेषु वर्णेषु ध्वनिरिति व्यवहरन्ति । "वर्णाः एव तु शब्दाः" इति भगवानुपवर्षः । शब्दस्य वर्णघटितत्वेन, अर्थस्य च वर्णबोध्यत्वेन, शब्दार्थयोरुभयोरपि वर्णमूलत्वम् । वर्णानां नादध्वनिमूलकत्वेन ध्वनिरेवसर्वेषामपि वर्णानां मूलं नित्यश्च । एवं ध्वनिमूलकत्वेनैव सुव्यवस्थिते काव्यत्वव्यवहारे स्फोटाङ्गीकारेवा का वाचो युक्तिः ? वैयाकरणैः सह साहित्यशास्त्रीयध्वनिसिद्धान्तैकदेशसाम्यमिष्टमित्यन्यदेतत् । आनन्दवर्धनाचार्यप्रयुक्तबुधपदस्य वैयाकरणपरत्वेऽपि स्वपक्षदार्ढ्यार्थमेव वैयाकरणमतोपन्यासः शक्यसमर्थनः । न च सर्वात्मना तत्पक्षांगीकारः । भरताचार्याऽभिव्यक्तेः रसबोधोपयिककविव्यापाररूपत्वं ब्रूते एव । साहित्यपरम्परायां ध्वनेरप्रसिद्धत्वमस्ति केषाञ्चिन्मते, तर्ह्यस्तु । परन्तु शाब्दिकनिकाये "ध्वनिः" शब्दोऽयमतीव प्रसिद्धः । स्फोटो ध्वनिश्च व्यङ्ग्यव्यञ्जकः । वर्णपदादिभेदेन स्फोटोऽनेकधा । स सर्वोऽपि व्यञ्जकतावच्छेदककुक्षिप्रविष्टः । रसादिरूपाणां सविशेषाणां शृङ्गारादीनां रसानामपि व्यञ्जकत्वांगीकारात् । अङ्गीरसस्तु व्यंग्य एवेति ध्वनिकृतामाशयः । अर्थोगुणीकृताभिधेयात्मा, गुणीकृताभिधेयश्च शब्दो वा, यत्रार्थान्तरमभिव्यनक्ति स ध्वनिः । एवञ्च व्यङ्ग्यार्थस्य प्राधान्ये ध्वनिः । तेन "स्फोटवादमूलक एव ध्वनिसिद्धान्तः" इत्युक्तमपास्तम् ।

वैयाकरणानां रीत्या स्फोटस्य व्यञ्जकानां ध्वनित्वमित्युक्तम् । तन्मते "ध्वनतीतिध्वनिः" इति ध्वनिशब्दार्थः । श्रोतशष्कुली सन्तानेनागताः अन्त्याः शब्दाः श्रूयन्ते, इति प्रक्रियायां शब्दजाः शब्दाः श्रूयमाणाः । तेषां घण्टानुरणन रूपत्वं तावदस्ति । ते च ध्वनिशब्देनोक्ताः । नादशब्दवाच्याश्च श्रूयमाणा वर्णा एवात्यन्तबुद्धिनिग्राह्यस्फोटा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भिव्यञ्जकाः ध्वनिः शब्देनोक्ताः यथा चाह भगवान् वाक्यपदीयकारः—

"यः संयोगवियोगाभ्यां करणैरुपजन्यते ।
स स्फोटः शब्दजाः शब्दाः ध्वनयोऽन्यैरुदाहृताः ॥
प्रत्ययैरनुपाख्येयैर्ग्रहणानुगुणैस्तथा ।
ध्वनिप्रकाशिते शब्दे स्वरूपमवधार्यते ।

तेन व्यञ्जकौशब्दार्थावपीह ध्वनिशब्देनोक्तौ । किञ्च वर्णेषु तावन्मात्रपरिणामेष्वपि सत्सु—

अल्पीयसापि यत्नेन शब्दमुच्चारितं मतिः ।
यदि वा नैव गृह्णाति वर्णं वा सकलं स्फुटम् ॥

तेषु तावत्स्वेव श्रूयमाणेषु वक्तुर्योऽन्यो श्रुतविलम्बादिवृत्तिभेदात्मा प्रसिद्धादुच्चारणव्यापाराभ्यामधिकः स ध्वनिरुक्तः । तदप्युक्तम्—

शब्दस्योर्ध्वमभिव्यक्तेर्वृत्तिभेदे तु वैकृताः :
ध्वनयः समुपोहन्ते स्फोटात्मातैर्न भिद्यते ॥

अयं प्राकृतध्वनिरेव वर्णः । प्राकृतध्वनिद्वाराप्रतीयमानेषु वर्णेषु वैकृतध्वनिः द्रुतविलम्बितादिवृत्तिभेदमुपजनयति । सत्यपि वैकृतध्वनिभेदे प्राकृतोध्वनिर्न विक्रियामासादयति । तस्माद्वैयाकरणानां मते त्रिधाध्वनिशब्दार्थो व्यवस्थितः न्यायनये शब्दजशब्दानां ध्वनिशब्दव्यवहारः ।

साहित्याचार्याणां मते प्रसिद्धशब्दव्यापारेभ्योऽभिधातात्पर्यलक्षणारूपेभ्योऽतिरिक्तो व्यापारविशेषोध्वनिरित्याति । वाच्योऽपि ध्वनिः, वाचकोऽपि ध्वनिः । ध्वनतीतिव्युत्पत्त्योभयोरपि व्यञ्जकत्वम् । संमिश्रयते विभावानुभावसंवलनयेति व्यंग्योऽपि, "ध्वन्यते" इति व्युत्पत्त्याध्वनिः । शब्देनाशब्दः, शब्दव्यापारः । न चासावभिधाव्यापारः प्रत्युतात्मभूतः सोऽपिध्वनिः । काव्यमिति व्यपदेश्यश्च योऽर्थ सोऽपि ध्वनिः । तदेतत्सर्वं "काव्ययतत्त्वार्थदर्शिभिः वाच्यवाचकसम्मिश्रः शब्दात्मा काव्यमिति व्यपदेश्यो व्यञ्जकत्वसाम्याद्ध्वनिरित्युक्तः" इत्यानन्दवर्धनोक्तिविवरणभूतेऽभिनवगुप्तकृते लोचनेऽन्यत्र च स्पष्टम् । व्यञ्जकव्यंग्यभावस्य सर्वस्मिन्नपिपक्षे समानोयोगः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

"सम्मिश्रणम्" साहित्यमित्यनर्थान्तरम् । शब्दार्थयोः साहित्यस्य काव्यत्वमित्युक्तत्वात् । वाक्यार्थसौन्दर्येणैव व्यंग्यार्थप्रतिपत्तिः । तस्माच्छाब्दार्थव्यापार–व्यंग्यसमुदायेति पञ्चस्वर्थेषु ध्वनिशब्दस्य प्रयोगो व्यवस्थितः ।

प्राचामाचार्याणां पुरतो यद्यपि महाकाव्यान्यप्यासन्, परन्तु काव्यानां स्वरूपादि निरूपणे, स्वसिद्धान्तथापने च सूक्तिमेव केन्द्रीकृत्य-काव्यशास्त्रीयाः सिद्धान्ताः स्थापिता यदि ते महाकाव्यानि समाश्रित्या-विचारयिष्यन् नूनं प्रतीयमानोऽप्यर्थस्तेषामक्षिलक्ष्येऽभविष्यत् । करुणरस-प्रधानं रामायणम् शान्तरसप्रधानं महाभारतञ्च प्रतीयमानार्थं प्रमाणी-कुरुतः, अत एव नवीनैराचार्यैः महाकाव्यानि पुरस्कृत्यैव साहित्य-शास्त्रीयाः नियमाः परिष्कृताः । सिद्धान्तस्थापने, विरोधनिराकरणे, पूर्वापरसङ्गतिस्थापने च तैः शास्त्रीयाः लौकिकाश्च न्याया अपि पुर-स्कृताः । रसाः स्वशब्दनिवेदिताः वाच्यतामुगच्छन्तो दोषावहा एव भवन्तीति ध्वनिकृतां तदनुयायिनाञ्च सिद्धान्तः सर्वथा स्तुत्येव यत्र सहृदयहृदयह्लादकस्य काव्यस्य प्रकारो प्रतीयमानार्थ संस्पर्शः न स्यात् । अत एव रसादेरर्थस्य काव्येषु प्रतीयमानतां व्यवस्थापयद्भि-रुक्तम्–

शब्दार्थशासनज्ञानमात्रेणैव न वेद्यते ।
वेद्यते स तु काव्यर्थतत्त्वज्ञैरेव केवलम् ॥
(ध्व० १।७)

रसादि रूपोऽर्थोऽशब्दो भवति ।

"अर्थः अशाब्दो भवति," इति लोकव्यवहारेऽपि प्रतिदिनमनु-भूयते अथवा मास्तु लोके अशाब्दोऽर्थः, काव्ये तु तथैव भवति । वाच्य-वाचकसम्मिश्रोपसर्जनीभूतव्यञ्जकाभिव्यङ्ग्यः काव्यानामर्थो भवति । वाच्यवाचकयोः व्यञ्जकत्वमेव । अशाब्दस्यापि निगूढरमणीयस्यार्थ बोधनायैव, व्यञ्जनावृत्तिः स्वीकृता ।

शब्दानुशासनार्थानुशासनेभ्यः काव्यानुशासनं विलक्षणं भवति । "पुत्रस्ते जातः" "कन्याते गर्भिणी" इति वाक्ययोरतएव, न काव्यत्वम्,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अर्थबोधकत्वेऽपि, लौकिकहर्षशोकाभिव्यञ्जकत्वेऽपि सहृदयहारित्वाभावात् । तस्मात् प्रबन्धकाव्येषु प्रतीयमानस्यार्थस्यैव प्राधान्यम् । रामायणस्य प्रारंभ एव तथ्यमेतत् स्फुटम् । "सोऽनुव्याहरणाद्भूयः शोकः श्लोकत्वमागतः" इति भगवान् वाल्मीकिरेव वक्ति । तदनुसारेणैव कविकुलगुरुणा कालिदासेनापि– निषादविद्धाण्डजदर्शनोत्थः, श्लोकत्वमापद्यत यस्य शोकः ।" एवमानन्दवर्धनाचार्य मतानुसारेण दण्डिभामहवामनभट्टोद्भट प्रभृतिनां सिद्धान्ताः मुक्तानुरोधिनः मुक्तकेष्वपि रसाभिव्यक्तिर्भवति–यथा "मा निषाद" इति श्लोके । तथापि मुक्तकापेक्षया महाकाव्येषु रसाभिव्यक्तिः निष्प्रत्यूहा । एवं प्राचीनसाहित्यशास्त्रीयनियमाः मुक्तकानुरोधिनः, नव्यास्तु महाकाव्यविषयकाः नियमाः । आनन्दवर्धनाचार्येणापि मुक्तकानां मीमांसा कृतैव । अत एव गुणालङ्काराणां काव्यरसाभिव्यक्तिहेतुत्वमेव भरतवाल्मीकिप्रभृतीनामपि दृष्ट्या सिध्यति । प्रतीयमानाभिधीयमानयोरर्थयोः स्पष्टीकरणपराः लौकिकाः शास्त्रीयाश्च न्यायाः पृथङ्मीमांसनीया अतः संक्षेपादेवात्र विचारितम् । मुक्तकेषु वाच्यार्थस्य प्राधान्यं सर्वसम्मतम् । प्रतीयमानार्थस्य व्यापकत्वेन वाच्यार्थस्य तदपेक्षया व्याप्यत्वात् । पदपदार्थातिरिक्तं काव्यसारसर्वस्वभूतं तत्वमेव ध्वनिमामनन्ते । तदुक्तं महाकविनाकर्णपूरेण–

"स जयति येन प्रभवति, सुदृशां व्यञ्जनावृत्तिः ।
अतिशयितपदपदार्थोध्वनिरिव मुरलीध्वनिर्मुराराते: ।।

अर्थात् पदं वैकुण्ठादिस्थानं पदार्थो वस्तु भूतो ब्रह्मानन्दः, ताभ्यामप्यतिशयितो पदपदार्थो, तत्रापि दुर्लभो येन हेतु भूतेन गोपाङ्गनानां नेत्रे व्यञ्जना विगताञ्जनावृत्तिः प्रादुर्भवति । आनन्दाश्रुधौतत्वात् । पदपदार्थातिशायित्वादेव पदपदार्थातिरिक्तम् । येन ज्ञानेन च सुष्टु पश्यन्तीति सुदृश आलङ्कारिकाः, तेषां दृशि ज्ञाने व्यञ्जनातत्वं परिस्फुरिति, स एव ज्ञानरूपो मुरलीमनोहरो जयति । एतेन निर्विशेषसविशेष, रूपस्याशेषविशेषातीतस्य तुरीयस्य च ब्रह्मणोऽपि रसमयत्वेन रसाभिन्नत्वेन प्रतीतिक्षमत्वं व्यञ्जनायाः प्रतिपादितं भवति ।

किञ्च ध्वनिर्नादब्रह्म । तदुक्तम् भगवता शङ्कराचार्येणापि–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मूलाधारात्प्रथममुदितो यस्तु भावः पराख्यः,
पश्चात्पश्यन्त्यथ हृदयगोबुद्धियुङ्मध्यमाख्यः ।
वक्त्रेवैंखर्यथ रुरुदिषोरस्य जन्तोः सुषुम्णा
बद्धस्तस्माद् भवति पवनप्रेरितो वर्णसंघः ।।

चतुष्टयी शब्दानां प्रवृत्तिरिति भगवान् भाष्यकारः । स चोत्पत्तिपक्षतः वैखर्यादिभेदैश्चतुर्भिः, बोधव्यापारविचारमालम्ब्य जातिगुणक्रियाद्रव्यादिभेदैश्चतुर्धा । अत्रोत्पत्तिपक्षमवलम्ब्यैव योगशास्त्रमतोद्धारः । तदुक्तम्–

वैखरीशब्दनिष्पत्तिर्मध्यमाश्रुतिगोचरा ।
द्योतितार्था च पश्यन्ती, सूक्ष्मवागनपायिनी ।।

इत्यप्यभिन्नामार्गः । नादोत्पत्तिविषये प्रतीच्यानामपि मतभिदं लभ्यते तदपि प्रदर्शयिष्यामः । परम्परया वर्णपदादीनां सर्वेषां ध्वनिरेव बीजम् । "व्यज्यते सर्वमनया" इति व्यञ्जना माया । मायाविशिष्टब्रह्मण एव चमत्कर्तृत्वोक्तेः ।

योगशास्त्ररीत्या प्रणवघटकीभूतनादब्रह्मसकाशादेव सृष्टयाद्युत्पत्तिः । एवं वर्णात्मकाः सर्वेशब्दाः नित्याः एव । कण्ठताल्वाद्यभिघातेन तेषां प्राकटयमेवाभिव्यक्तिः । प्रणवघटकीभूतस्य नादस्य स्वरूपानुभवस्तु रोदनसमये नासिकाद्वारा भवति । तस्माद्वैखरीदशापन्नाद् भावात् पवनप्रेरितो वर्णसमूहः सर्वेषां प्रत्यक्षविषयत्वमुपयाति । शब्दार्थयोः काव्यशरीरत्वादेव प्राधान्येन तयोश्च वर्णमूलत्वेन वर्णानाञ्च ध्वनिमूलत्वेन ध्वनेश्च नादब्रह्माभिन्नत्वेन नादब्रह्मैव सर्वेषामपि वर्णानां मूलं नित्यञ्च । काव्याभिव्यक्तो निर्विशेषोऽङ्गीरसोऽपि नित्य एव । "रसो वै सः" इति श्रुति वेद्यस्यैव रसरूपत्वादित्यत्र विस्तरः । नादस्य वेदांशत्वेन विच्छित्या काव्योपयोगित्वात् । शब्दार्थमचमत्काराश्रयस्य काव्यस्य शरीरत्वं तावन्निर्विवादम् । कस्तयोवर्णमूलत्वम् । तत्र शब्दस्य वर्णघटित्वाद्वर्णमूलत्वम् । अर्थस्य च वर्णबोध्यत्वेन वर्णमूलत्वम् । व्यङ्ग्यमेवध्वनिः । काव्यञ्च–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उत्तमं ध्वनिवैशिष्ट्ये मध्यमेतच्च मध्यमम् ।
अवरं तत्र निष्पन्द इति त्रिविधमादितः ।।"

काव्ये ध्वनिपदप्रयोगस्तु ध्वनिसम्बन्धाल्लाक्षणिक एव । "काव्येनेदं वस्तु, अलङ्कारो रसो वा ध्वन्यते" इति व्यवहारात् ध्वनिपदं न करण साधनमपितु कर्मसाधनमेव । ध्वनिपदस्य मुख्यः प्रयोगस्तु व्यंग्यार्थे एव न तु काव्ये । ध्वनिशब्दस्य पञ्चधार्थनिर्वचनं ध्वान्यालोके कृतम् । तदुत्तरभाविभिस्तथैवानुसृत्यकाव्यानां ध्वनिकृतचमत्कार तारतम्येन काव्यभेदा उपवर्णिताः । तदेतत् ध्वनिसिद्धान्तसम्मतकाव्यादिस्वरूपनिर्णयावसरे वक्ष्यामः । स्फोटवादिनस्तद्विरोधिनश्चोभयोरभिमतेन ध्वनेरस्तित्वं स्वीकृतं भवति । एवञ्च स्फोटानङ्गीकारेऽपि ध्वनिसत्ता वक्तुं शक्यते । परन्तु स्फोटवादिभिर्वैयाकरणैः व्यञ्जनावृत्तिः स्वीक्रियते । सा च शाब्दी एव नत्वार्थी । साहित्यशास्त्रीयसिद्धान्तेन व्यञ्जना आर्थी अपि भवति– "सर्वेषां प्रायशोऽर्थानां व्यञ्जकत्वमपीष्यते" इति मम्मटोक्तत्वात् । रसबोधेऽपितात्पर्यलक्षणानां वृत्तीनां विश्रान्तायां व्यञ्जनावृत्तिस्वीकार आवश्यक एव आनन्दवर्धनाचार्यास्तृतीयोद्योते व्यञ्जनावृत्तिस्थापनावसरेणैव व्यञ्जनायाः शाब्दिकानुमतत्वात् मीमांसकाविरुद्धत्वं च मीमांसान्यायैः प्रसाधितवन्तः । तत्रैवानुमितिवादिनामपि रुचिरं प्रत्याखानं विद्यते । तस्मात् ध्वनिकारात् प्रागेव ध्वनिसिद्धान्तस्य खण्डनमण्डनानि परम्परयैव प्रचलितानि ।

इत्थमानन्दवर्धनेन ध्वनिसिद्धान्तस्य दृढतरीस्थापना कृता । साहित्यशास्त्रीयरीत्या तस्याः काव्यार्थबोधोपयोगित्वप्रतिपाद्य काव्यलक्षणभेद–रस–गुण–रीति–दोषाणाञ्च संक्षिप्ता किन्तु सारभूता रूपरेखा प्रस्तुता । ध्वन्यालोकग्रन्थे स्वपूर्वभाविमुक्तककाव्योपयोगिनां नियमन्यायानां परिष्कारपूर्वकं ग्रहणम्, स्वस्मदुत्तरभाविनां कृते च सैद्धान्तिकी व्यावहारिकीचाधारभूमिः प्रस्तुता । एतेन काव्यविषये सर्वेऽपि प्रश्नाः ध्वनिसिद्धान्तसमाश्रयणेनैव समाहिताः । अत एव साहित्यशास्त्रस्य ध्वनिसिद्धान्त एव मौलिकः । श्रीमद्भागवते सांख्यदर्शने, वेदान्तदर्शनेचापि ध्वनिसिद्धान्तस्य चर्चास्ति । स्फोटांगीकारे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मतभेदोऽस्ति परन्तु ध्वनि सत्ता निर्विवादा। नैयायिकास्फोटविरोधिनोऽपि ध्वन्यात्मकवर्णात्मक भेदेन शब्दस्य द्वैविध्य मिच्छन्ति। साहित्यशास्त्रीयो ध्वनिसिद्धान्तस्तु सर्वथापिमौलिकः।

"विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः" इत्ययमेव साहित्यशास्त्रस्य मुख्योऽस्ति नियमः। नियमस्यास्य बहुविधानि व्याख्यानानि राजन्ते। तत्सर्वं नियमाध्याये यथाशास्त्रमुवर्णयिष्यामः।

भारताचार्यस्य "संयोगः" भामहाचार्यस्य "सहितौ" आनन्दवर्धनाचार्यस्य "सम्मिश्रणम्", कुन्तकाचार्यस्य "साहित्यम्" च समानावेव। अतः साहित्यमपि काव्यस्य मुख्यं तत्त्वम्। ध्वनेर्व्यापारयुगलम्। ध्वननमनुध्वननञ्च। यत्र केवलं ध्वाननं तदुत्तमं काव्यम्। यत्र तुध्वननानुध्वननेतदुत्तमोत्तमम्। तदुक्तम्–

ध्वनेर्ध्वन्यतरोद्गारे तदेवह्यु त्तमोत्तमम्।
शब्दार्थयोश्चैवचित्र्ये द्वे यातः पूर्वपूर्वताम्"
उत्तमं ध्वनिवैशिष्टयं मध्यमेतत्रमध्यमम्।
अवरं तत्र निष्पन्दः -------- ॥

(अ. क. १।६, ७)

मम्मटादिभिरापाततः ध्वन्युत्थापितानुध्वननादिमार्गाणांतद्व्यतिरिक्तानाञ्च सर्वेषामेव ध्वनीनामुत्तमकाव्यत्वमेवोक्तम्। परन्तु व्यञ्जकतया आस्वाद्यस्य तारतम्यं स्फुटमेव विभिन्नकाव्यभेदकल्पना भवति। पण्डितराजेनापि उत्तमोत्तमाख्यभेदः स्वीकृतः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

साहित्यमीमांसा

काव्यशरीरतयाभिमतयोः शब्दार्थयोः अन्यूनानतिरिक्तत्वेन मनोहारी सम्बन्धः साहित्यम् । आनन्दवर्धनमतानुसारेणापि शब्दार्थयोः साहित्यं काव्यम् । "शब्दार्थौ सहितौ काव्यम्" इति भामहाचार्यमतम् । कुन्तकाचार्यमतानुसारेण "विशिष्टमेवेह साहित्यमभिप्रेतम्" । तन्मते "सहितौ" पदस्य "विशिष्टौ" अर्थः । "काव्यशब्दोऽयं गुणालङ्कार संस्कृतयोः शब्दार्थयोरूढः" इति वामनाचार्यवचनात्सहितौ" अर्थात् "गुणालङ्कार संस्कृतौ" । वाच्यवाचकशब्दार्थसाहित्यस्य लोकप्रसिद्धत्वेनाविशिष्टत्वाविशेषादेव–

"साहित्यमनयोः शोभाशालितां प्रतिकाप्यसौ ।
अन्यूनानतिरिक्तत्वंमनोहारिण्यवस्थितिः ।।

अनयोरिति काव्यशरीरत्वेनाभिमतयोः शब्दार्थयोः तथा च–

शब्दो विवक्षितार्थैकवाचकोऽन्येषु सत्स्वपि ।
अर्थः सभेदयाह्लादकारिस्वस्पन्दसुन्दरः ।।
शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि ।
बन्धे व्यवस्थितो काव्यं तद्विदाह्लादकारिणि ।।

"सहिताविति सहितभावेन साहित्येनावस्थितो । तेन शब्दार्थौ द्वौ "सम्मिलितौ" काव्यम् । वैशिष्ट्यञ्च वक्रतादविचित्रगुणालङ्कारसम्पदां परस्परस्पर्धाधिरोहः" । तथा च–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

"समसर्वगुणौ सन्तौ सुहृदाविव सङ्गतौ ।
परस्परस्य शोभायै शब्दार्थौ भवतो यथा" ।।

(१।१८ व. जी.)

वक्रत्वञ्च शास्त्रादिप्रसिद्धशब्दार्थोपनिबन्धव्यतिरेकी कविव्यापारः तत्क्रियाक्रमः । स एव व्यापारः सम्बन्धो वा काव्ये साहित्यशब्देन व्यपदिश्यते ।

शब्दार्थयोर्व्यङ्ग्यव्यञ्जकभावस्य तन्मते वाच्यवाचकान्तर्भावबलमेव । तदुक्तम्-- "ननु च द्योतकव्यञ्जकावपि शब्दौ सम्भवतः । परन्तु यस्मादर्थप्रतीतिकारित्वसामान्यादुपचारात्तावपि वाचकावेव । एवं द्योत्यव्यंग्ययोरर्थयोः प्रत्येयत्वसामान्यादुपचाराद्वाच्यत्वमेव । वाच्यवाचकभावस्यैव लोकप्रसिद्धत्वादन्यैरपि तदपलपितुमशक्यत्वादेव ।

तन्मतेऽलङ्कारशब्दः शरीरस्य (शब्दार्थयोः) शोभाऽतिशयकारित्वात् मुख्यतया कटककुण्डलादिषु वर्त्तते । तत्कारित्व सामान्यादुपचारादुपमादिषु, तद्वदेव च तत्सदृशेषु गुणादिषु, तथैव च तदभिधायिनि ग्रन्थे । शब्दार्थयोरैक्ययोगक्षेमत्वादैक्येन व्यवहारः । यथा गौरिति शब्दः गौरित्यर्थः ।

शब्दार्थौ सहितावेव सर्वदा प्रतीतौ स्फुरतः । तस्मात्शब्दार्थयोः साहित्यं निसर्गसिद्धम् । कः सचेता पुनस्तदभिधानेन निष्प्रयोजनमात्मानमायासयति । अतः शब्दार्थयोरविनाभावस्यौत्सर्गिकत्वेन साहित्यस्यापि लोकसिद्धत्वादनुशासनम् वैयर्थ्यम् । परन्तु पदवाक्यप्रमाणव्यतिरिक्तः कश्चन कविप्रतिभानिर्वर्तितः काव्यव्यापारविशेषः साहित्यम् । अतः परस्परोत्कर्षजनकत्वे सति शोभाजनकत्वं साहित्यपदार्थः । शोभाशौन्दर्यमुच्यते । सैव च सहृदयह्लादकारिता । तस्यां स्पर्धित्वेन या सावयवस्थितिः– परस्परासाम्यसुभगमवस्थानं सा साहित्यमुच्यते । तच्च वाचकस्य वाचकान्तरेण, वाक्यस्य वाच्यान्तरेण साहित्यमभिप्रेतम् । वाक्येकाव्यलक्षणस्य परिसमाप्तत्वात् ।

ननु च वाचकस्य वाच्यान्तरेण कथं न साहित्यमिति चेन्न, क्रमव्युत्क्रमे प्रयोजनाभावादसमन्वयाच्च । तस्मात्काव्यशरीरत्वेनालङ्कार्यत्वे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नाभिमतयोः शब्दार्थयोः यथा स्वं यस्यां स्वसम्पत्सामग्रीसमुदायः सहृदयहृदयाह्लादकारी परस्परस्पर्धया परिस्फुरति सा काचिदेव विन्याससम्पत् साहित्यव्यपदेशभाग्भवति । तदुक्तम्—

मार्गानुगुण्यसुभगो माधुर्यादिगुणोदयः ।
अलङ्करणविन्यासो वक्रतातिशयान्वितः ।।
वृत्यौचित्यमनोहारि रसानां परिपोषणम् ।
स्पर्धयाविद्यते यत्र यथास्वमुभयोरपि ।।
सा काव्यवस्थितिस्तद्वत्तद्विदानन्दसुन्दरा ।
पदादिवाक्परिष्पन्दसारः साहित्यमुच्यते ।।

एतेषाञ्च पदवाक्यप्रमाणसाहित्यानां चतुर्णामपि प्रतिवाक्यमुपयोगः । तथा चैवमेतत्पदमेवं स्वरूपं गकारौकारविसर्जनीयात्मकमेतस्य चार्थस्य प्रातिपदिकार्थपञ्चकलक्षणस्याख्यातषट्पदार्थलक्षणस्यवाचकमिति पदसंस्कारलक्षस्य व्यापारः । पदानाञ्च परस्परान्वयलक्षणसम्बन्धनिबन्धनमेतद्वाक्यार्थतात्पर्यमिति वाक्यविचारलक्षणस्योपयोगः । प्रमाणेन प्रत्यक्षादिनैतदुपपन्नमिति युक्तियुक्तत्वं नामप्रमाणलक्षणस्य प्रयोजनम् । इदमेव परिस्पन्दमाहात्म्यात्सहृदयहारितां प्रतिपन्नमितिसाहित्यस्योपयुज्यमानता । एतेषां यद्यपि प्रत्येकं स्वविषये प्राधान्यमन्येषां गुणीभावस्तथापि सकलवाक्परिषदानन्दजीवितायमानस्य साहित्यलक्षणस्यैव कविव्यापारस्य वस्तुतः सर्वत्रातिशायित्वम् यस्मादेतदमुख्यतयापि यत्र वाक्यसन्दर्भान्तरे स्वपरिमलमात्रेणैव संस्कारमारभते, तस्यैव तद- धिवासशून्यतामात्रेणैव रमणीयताविरहः प्रसज्जते ।

प्रयोजनपार्थक्यं प्रस्थानपार्थक्यं प्रयोजयति । काव्यप्रयोजनं हि—

चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि ।
काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते ।।

अर्थात् रसास्वादद्वाराविनेयानाम् स्वाभिमुखीकृत्य कृत्याकृत्य प्रवृत्तिनिवृत्युपदेशद्वारा परमेश्वरसामुख्याधानं, न तु मनोरञ्जनमेव । अत एव—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धर्मार्थकाममोक्षषु वैचक्षण्यं कलासु च ।
करोति कीर्तिं प्रीतिं च साधु काव्य निबन्धनम् ।।

इत्युक्तं भामहेन । एवं कविप्रतिभानिर्वर्तितः काव्यार्थ–बोधनानुकूलः व्यापारविशेषः काव्ये प्रधानम् । स व्यापार–विशेषः, अभिधेति व्यासः । वक्रोक्तिरिति कुन्तकः । लक्षणेतिमुकुलभट्टः । व्यञ्जनेतिध्वनिकाराः । व्यापारप्राधान्ये काव्यधीरिति भट्टनायकाचार्याश्च ।

साहित्यशास्त्रे व्यापारो हि वृत्तिरित्युच्यते । तदुक्तम् साहित्यमीमांसायाम्–

वृत्त्यादीनां समष्टिः स्यात्साहित्यं तत्परिष्कृतिः ।
शब्दार्थयोः परिष्कारः, कविस्तस्य प्रसाधकः ।।
अष्टौवृत्त्यादयस्तत्र परिष्कारश्चतुर्विधः ।
चतुर्विधः परिष्कर्त्ता रसिकस्त्रिविधोमतः ।।
वृत्तिर्विवक्षातात्पर्यप्रविभागौ व्यपेक्षणम् ।
सामर्थ्यमन्वयै कार्थ्ये अष्टौवृत्त्यादयः स्मृताः ।।
दोषत्यागो गुणाधानमलङ्कारो रसान्वयः ।
इत्थं चतुर्विधा क्लृप्ता साहित्यस्य परिष्कृतिः ।।
साहित्यस्य परिष्कारः पारम्पर्येण सिद्ध्यति ।
समुदायपरिष्कारः समुदायिपरिष्कृतैः ।
(सा. मी. १,२ प्रमाणे)
साहित्यं नाम सम्बन्धः, सोऽवृधेतिमनीषिणः ।
शब्दार्थावष्टभिर्मार्गैः सम्बद्धयेते परस्परम् ।।

दोषहानगुणोपादानालङ्कारसंयोगरसावियोग रूपाणां" भोजराजोक्तानामपि साहित्यत्वमेवोक्तम् । परन्तु चतुर्णामप्येतेषामागमापायित्वात्साहित्यस्यस्वरूपप्रवेशाभावात्, परिष्कारत्वेनोक्तिः । तस्मात् सम्बन्ध परिष्कारभेदेन साहित्यस्य द्वैविध्यमुक्त्वा सम्बन्धस्याष्टौभेदाः परिष्कारश्चतुर्धेतिसाहित्यमीमांसायाम् स्पष्टम् । सम्बन्धश्च–

"सशक्तिरेव सम्बन्धोव्यापाराद्यभिधानवान् ।
वृत्त्यादयस्ताः कथ्यन्ते शक्तयः पुनरष्टधा ।।"

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शक्तिनिष्कर्षस्वरूपप्रविभागादेः साहित्यान्तर्भावं दोषहानादि चतुष्टयस्य बहिर्भावोऽपि सकारणः–

वाक्याद्‌वाक्यार्थबुद्धौ यद्‌व्युत्पत्ति समभाणि तत् ।
यत्सर्वमेव साहित्यवीथिकामवगाहते ।।

एवं साहित्यविषयकमतान्युपस्थाप्य साहित्यकाव्ययोरभेदः ख्याप्यते । तदुक्तम् तेनैव–

एतन्मतमपि प्रायोमतमस्माकमश्नुते ।
अभेदः ख्याप्यते तत्र किन्तु साहित्य काव्ययोः ।।

एवं कुन्तकाचार्यमते परिष्कारः साहित्यम् । रूय्यकानुयायिनां मते शब्दार्थयोः सम्मेलनमात्रमुक्तिरूपं साहित्यम्, तच्छास्त्राख्यानादि साधारणम् । अन्यत्परिष्कारविशिष्टं काव्यमिति मन्यन्ते । साहित्य-विशिष्टं काव्यमिति स्थितम् । ननु–

"साहित्यं सपरिष्कारं कविना परिकल्पितम् ।
भावयन् रसिकोलोके सुखमत्यन्तमश्नुते ।।"

इत्युक्तम् । तत्र रसान्वयोऽपि परिष्कारः । तेन रसोऽपि तत्सामग्री-मध्यमनुप्राविक्षत् तेन रसेन रसो भवतीत्यायातम् । एवञ्चात्माश्रयो दोषः इति चेन्न, रसान्वयोनाम न साहित्यस्य फलान्वय । किन्तु वाक्येषु तद्विभावादि समर्पकत्वमित्यदोषः ।

यद्वा, तत्तद्विभावादि सामग्र्याभिव्यक्तशृङ्गाराद्यनेकाभिधानवा-नान्तरो रसोऽन्यः । स एव काव्यार्थः । तद्‌भावनयापरमरसस्य व्यक्ति-र्भवति । सैव च प्राप्तिर्भवति इति सर्वं सुस्थम् । स्यादेतत् । अलम-वान्तररसेन । परमरस एव काव्यार्थो भवतु । न वा कल्पनागौरवभयम् सर्वदृश्यमिदमस्माभिरपि द्रष्टुं शक्यते ।

न हि काव्यस्वरूपसामग्रीसमनन्ततरमात्मस्वरूपस्य निरतिशया-स्याभिव्यक्तिः । अभिव्यज्यन्ते च तस्य मन्त्रास्तत्तदुपाध्यवच्छिन्नाः शृङ्गारादयः प्रमीयते च तद्वारा परमरसप्राप्तिः । "शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति" इति न्यायात् । अभिव्यंग्ये काव्योत्पाद्यादि शब्दाः गौणाः मन्तव्याः । भावनापि रस इष्यते, प्राप्तिरपीयं प्रकाशतोनातिरि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

च्यते । एवञ्च कूटस्थ आनन्दो रस एक एव सविशेष निर्विशेष भेदेनापोद्धारदिशा विभज्यते । तदेतत्सर्वमग्निपुराणेऽन्यत्र च स्पष्टम् । अत एव भरतमुनिनापि विभावानुभावसञ्चारिणां साहित्यादेवरसनिष्पत्तिरिति सूत्रेण साहित्याख्य कविव्यापारस्य रसनिष्पत्ति हेतुभूतत्वमेवोक्तम् ।

शब्दार्थयोर्वाच्यवाचकव्यतिरिक्तः व्यंग्यव्यंजकभावोऽप्यस्तीति व्यक्तिवादिनामपि मते चेत्थमेव साहित्यव्यवस्थेति रससूत्रव्याख्यानप्रसङ्गेनैतद्व्यक्ती भविष्यति । साहित्यस्यैव प्राधान्येन काव्यशास्त्रग्रन्थानां "साहित्यशास्त्र" शब्देन व्यवहारोऽपि शास्त्रपरम्परानुरोधी न तु मनागपि काल्पनिकता प्रसज्जतीति साहित्यमीमांसा संक्षेपः ।

११. अभिव्यक्तिवादः–

श्रीमदानन्दवर्धनाचार्येण स्फोटवादं पुरस्कृत्य ध्वनिसिद्धान्तः स्थापितः स्फोटस्वरूपविषये विपश्चितां विप्रतिपत्तयः सन्ति । भगवता व्यासाचार्येणाग्निपुराणे– "प्रकटत्वमभिव्यक्तिः" इत्युक्तम् । स्फोटविषये द्वादशस्कन्धे तैर्यदुक्तं तदेवात्र संगृह्यते । तथा हि विन्दु प्रणवः स च बीजं सच्चिदानन्दरूपविभक्तेन, सर्ववर्णप्रभवत्वात् । तदुक्तम्–

समाहितात्मनो ब्रह्मन् ब्रह्मणः परमेष्ठिनः ।
हृद्याकाशादभून्नादो वृत्तिरोधाद्विभाव्यते ॥
ततोऽभूत्त्रिविधोङ्कारो योऽव्यक्तप्रभवः स्वराट् ।

इत्यारभ्य–

ततोऽक्षरसमाम्नायमसृजद्भगवानजः इति ।

तेन नादस्य नित्यत्वेन तदात्मकस्योंकारस्य च नित्यत्वमेव, स्वराडिति पूर्वोक्तेः । तदात्मकस्य च वर्णसमूहस्यपि तथैव तत्त्वम् । आकाशस्य नित्यद्रव्यत्वे तद्गुणस्यापि नित्यत्वम्, गुणाश्रयो द्रव्यमिति गुणगुणिनोः समवायसम्बन्धात् । नित्यसम्बन्धः समवायः अनित्यसम्बन्धः संयोगः । "हलोऽनन्तरा संयोगः" "समवायेन समवैति" । तेन पवनप्रेरणाप्रेरणवशादेवाभिव्यक्त्यनभिव्यक्ती । वस्तुतस्तु नित्यतैव तेषामित्ययमान्तरस्फोटः । तदुक्तम्–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

"शृणोति य इमं स्फोटम्"

तथा च यो गुणः नित्यद्रव्यमात्रे वर्तते स नित्यो भवति । अतएवाकाशवृत्ति द्वित्वबहुत्वादि संख्यानां तद्वृत्तिसंयोगानां चानित्यत्वेऽपि न क्षतिः । तेषामाकाशमात्रवृत्तित्वाभावात् । रागद्वेषादयोऽपि नात्ममुक्तम् । भौतिकद्रव्यपरमाणूनां खण्डनं सम्प्रति प्रतिदिनं भवति । एवागेड्रो महाभागस्य "अणुनित्यतावादः" "डाल्टन" महोदयस्य "परमाणुनित्यतावादः" ।

द्वयोरपिवादयोर्मिथ्यात्वं सञ्जातम् । बारे महाशयेन, परमाणूनां संरचनापि प्रदर्शिता । आईन्स्टीन कृतं परमाणु खण्डनन्तु पञ्चमस्कन्धे परमाणूनामनित्यत्वमेव सिद्धान्तयति । काणादाः वैशेषिका अपि कार्यद्रव्यपरमाणूनामनित्यत्वमंगीकुर्वन्ति । कारणपरमाणूनामेव नित्यत्वं गुणाः प्रत्युतान्तकरणगुणाः परमाणवोऽपि त्रसरेणोः सकाशान्नातिरिक्ताः । एवं भगवता व्यासेन पञ्चमस्कन्धे परमाणूनामज्ञानकल्पितत्वेनानित्यत्वं तेषां मते । एवं शब्दपरमाणुरूपाणां वर्णानां नैयायिकमतेऽपि नित्यत्वं न विरुध्यति । वर्णानां नित्यद्रव्यगुणत्वेन नित्यत्वात् । नित्यद्रव्यमात्रगुणत्वन्तु नित्यद्रव्येतरावृत्तित्वे सति नित्यद्रव्यगुणम् ।

तथा च शब्दस्य नित्यद्रव्यभिन्नेऽनित्यद्रव्ये पृथिव्यादाववृत्तेराकाशरूपे नित्यद्रव्ये वृत्तेश्च नित्यद्रव्यमात्रवृत्तिगुणत्वाद्वर्णानां नित्यत्वमव्याहतम् । वैशेषिकमते ध्वनिरेव शब्दः । "तर्हि ध्वनिः शब्दः" इति भगवान् भाष्यकारः । आकाशवृत्ति द्वित्वबहुत्वादि संख्यानामाकाशवृत्ति संयोगानाञ्च विशेष्यदलसत्त्वेऽपि सत्यन्तदलाभावान्न नित्यद्रव्यवृत्तिमात्रगुणत्वम् । आकाशेतरावृत्तित्वाच्च । तथा च संख्यादीनामाकाशभिन्ने पृथिव्यादावपि वर्तमानत्वेनाकाशमात्रवृत्तित्वाभावात् ।

आकाशस्य नित्यद्रव्यत्वं तु आकाशस्तल्लिंगात् (८।१।२२) "आकाशे चाविशेषात्" इति भगवद्बादरायणसूत्रतद्भाष्यादौ स्पष्टम् ।

घटादीनां कपालादौ द्रव्येषु गुणकर्मणोः ।
तेषु जातेश्च सम्बन्धः समवायः प्रकीर्तितः ।।

इति समवायलक्षणतो द्रव्यस्य नित्यत्वे तद्गुणस्य नित्यत्वमिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वर्णानां नित्यत्वमेव साहित्यशास्त्रसम्मतम् तदनुसारेणैव वर्णानां वाचकत्वद्योतकत्वादिकमानन्दवर्धनाचार्येणापि व्यवस्थापितन् । अत एव च–

वर्णानामर्थसंघानां रसानां छन्दसामपि"

काव्यार्थव्यञ्जकत्वमुक्तं भवति। काव्यार्थश्च रस एवेति, स चाप्राकृता–प्राकृतभेदेन द्विविध इति पूर्वतोऽन्वयः। उभयोरपि भावमूलकत्वात् । भावोभावना सैवोत्पादना सैव च क्रिया । प्रकृतिजन्यत्वबोधेप्रकारीभूतो भावः ।

वर्णानां नित्यत्वविषये मीमांसकसिद्धान्तोऽनुकूल एव। वर्णा एव शब्दाः। ते च मित्थ्याः "औत्सर्गिकस्तु शब्दस्यार्थो न सम्बन्धः" इति भगवान् जैमिनिः। "सिद्धे शब्दार्थ सम्बन्धे" इति कात्यायनः। अत एव काव्यपुरुषस्य शरीरत्वेन निर्दिष्टयोर्नित्यत्वं व्यञ्जकत्वं तेन काव्यार्थाभिव्यञ्जकत्वं सिद्धान्तितं भवति ।

वर्णानां शब्दावयवत्वमुत्पन्नप्रध्वंसित्वमनित्यत्वञ्चेति तार्किकाः। "न शब्दनित्यत्व कार्यत्वप्रतीतेः", (सां. सू. ५।५८) इति च कापिलन्यायः। वैयाकरणैः प्रतिष्ठापिते स्फोटवादे नितरामास्थावन्तः आनन्दवर्धनमम्मटभट्टादयः "यद्यपि नित्यस्तथापि कार्यः" इति महाभाष्योक्तदिशानित्यानामपि वर्णानामभिव्यक्तिमिच्छन्ति । तथा च कर्णपूरः–

"सच्चिदानन्दविभवात्सकलात् परमेश्वरात् ।
आसीच्छक्तिस्ततोनादस्तस्माद्बिन्दु समुद्भवः।
नादो बिन्दुश्च बीजञ्च स एव त्रिविधो मतः।
भिद्यमानात्पराद्बिन्दोरुभयात्मा रवोऽभवत् ।
स रवः श्रुतिसम्पन्नः शब्दब्रह्माभवत्परम् ॥

ननु वर्णानां नित्यत्वमते वर्णघटितकाव्ये कथं कविजन्यत्वव्यवहार इति चेत्तदर्थमेवाभिव्यक्तिसिद्धान्तस्य स्वीकारोऽस्त्यावश्यकः । तदुक्तं भगवताशङ्कराचार्येणापि–

मूलाधारात्प्रथममुदितो यस्तुभावः पराख्यः ।
पश्चात्पश्यन्त्यथ हृदयगो बुद्धियुङ्मध्यमाख्यः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वक्त्रे वैखर्यथ रुरुदिषोरस्य जन्तोः सुषुम्ना
बद्धस्तस्माद् भवति पवनप्रेरितोवर्णसंघः ।।
(प्रपञ्चसारपटले ३।४३)

योगशास्त्रमते उत्पत्तिर्वर्णानामभिव्यक्तिरेव–

वैखरीशब्दनिष्पत्तिर्मध्यमा श्रुतिगोचरा ।
द्योतितार्थाच पश्यती सूल्माबागनपायिनी ।।

इत्यप्यभिन्न एव मार्गः । नित्याया अपि शक्तेरुत्पत्तिकथनमुपपद्यते । तदुक्तं मार्कण्डेयपुराणेऽपि–

देवानां कार्यसिध्यर्थमाविर्भवति सा यदा ।
उत्पन्नेति तदा लोके सा नित्याप्यभिधीयते ।

वैशेषिकमते ध्वनिरेव शब्दः । स च वर्णावर्णात्मकश्चेति द्विविधः तदभिव्यक्तिस्तु कार्यमित्यभिन्नः स्थूलतः सिद्धान्त इत्यलमतिपल्लवितेन ।

एके तु शब्दार्थान्तरं स्फोटं शब्दब्रह्मेत्याहुः तदेब शब्द ब्रह्म । शब्दार्थरूपजगदुपदानकारणमपि तदेव । तदुक्तं हरिणापि–

"अनादिनिधनं ब्रह्मशब्द तत्त्वं यदक्षरम् ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः" ।।
(वा. प. १।१)

स्फोटस्य निरंशत्वाभिन्नत्वादिकमपि,

"नादस्य क्रम जातत्वान्न पूर्वो नापरश्च सः ।
अक्रमः क्रमरूपेण भेदवानिव गृह्यते ।।"
(वा. प.)

"शृणोति य इमं स्फोटं सुप्तश्रोत्रे च शून्यदृक् ।
तेन वाग्व्यज्यते यस्य व्यक्तिराकाश आत्मनः ।।

अत्र "– – – – – ननु जीवएव त" शृणोतु ? नेत्याह । सुप्तश्रोत्रे ११।६) कर्णपिधानादिना अवृत्तिकेऽपि श्रोत्रे सति । जीवस्तु करणाधीनज्ञानत्वान्न तदा श्रोता । तदुपलब्धितु तस्य परमात्मद्वारिकैवेत्याहुः श्रीधरस्वामिपादाः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एतेन स्फोटात्मकशब्दश्रवणस्यात्मलिङ्गता प्रोक्ता। आन्तर-स्फोटआन्तरः शब्दः। स च हृदयगोबुद्धि युक् च। एतदेवाभिप्रेत्य "अथवा प्रतीतपदार्थको लोकेध्वनिः शब्दः" इति पन्नगवीव्याख्यानपरीयसा नागेशभट्टेनापि–

"ध्वनि पदेनात्र बैखरी, स्फोटपदेनाभिव्यक्तत्वादिको मध्यमावस्थः आन्तरः शब्द उच्यते। ब्रह्मतत्त्वं हि शब्दरूपतया प्रतिभाति" इत्युक्तमुद्योते। तदेवं वराटिकान्वेषणाय प्रवृत्ताश्चिन्तामणिं लब्धवन्त इति शब्दकौस्तुभे भट्टोजिदीक्षिताः। नादध्वनेरप्यत्रपरामर्शः। तथा च स्फोटसिद्धिन्यायविचारे–

"तत्र केचन नादानां स्फोटाभिन्नत्वमूचिरे।
अंसवेद्यत्वमितरे स्वातन्त्र्यं मेनिरे परे॥"

वैयाकरणा वहिः स्फोटमाहुः। यदाह स्फुटमेव भगवान् भाष्यकारः– "एवं तर्हि स्फोटः शब्दः ध्वनि शब्दगुणः। कथम्? भेर्याघातवत्" इति। "एवं तर्हि इति पदाभिव्यंग्यो व्यक्तिस्फोटोऽत्र विवक्षितः। स च नित्यः। एतच्च" येनोच्चारितेन ककुदखुरविषाणानां प्रत्ययो भवति इति विचारितम् कैय्यटेन।

नागेशस्तु "अत्रेदं बोध्यम्। एक एव स्फोटस्तत्तद्वर्णैस्तत्तद्रूपेणाभिव्यज्यते।" ध्वनिः शब्दगुण इति भाष्ये ध्वनिशब्देन वर्णो वैकृतध्वनिश्च। प्रमाणञ्च–

स्फोटस्य ग्रहणे हेतुः प्राकृतो ध्वनिरिष्यते।
स्थितभेदे निमित्तत्वं वैकृतं प्रतिपद्यते॥ इति।

"वस्तुतस्तु वाचकता स्फोटैकनिष्ठा तत्र चाष्टौपक्षाः, वर्णस्फोटः, पदस्फोटः, वाक्यस्फोटः, अखण्डपदस्फोट, अखण्डवाक्यस्फोटः इत्थं पञ्च व्यक्तिस्फोटाः। वर्णपदवाक्यभेदेन त्रिविधोजातिस्फोट इति शब्दकौस्तुभेदीक्षित चरणाः।

वर्णानां प्रत्युच्चारणमन्यथा प्रतीयमानतया अनित्यत्वेनाशुविनासभाविनां च तेषां संयोगासम्भवेन तत्समुदायस्यापि सम्बन्धित्वाभावेन प्रत्येकं वर्णेषु वृत्तो व्यभिचारेण पूर्वपूर्ववर्णानुभवजन्यसंस्कारबीजवति,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अन्त्यवर्ण जनितपरिपाकशालिनि हृदये झटिति समुदीयमानस्य स्फोट-रूपस्यैव शब्दस्य नित्यतया तत्रैव नित्यसम्बन्धस्य योग्यतया वृत्तिमत्त्व-मुचितत्वम् । वृत्तिमत्त्वमर्थवत्त्वम् । "एतत् संज्ञाफलभूतविभक्तीतरसम-भिव्यवहारानपेक्षलोकेऽर्थविषयक बोधजनकत्वमर्थवत्त्वमिति नागेशाः" ।

स्फोट्यते व्यज्यते वर्णैरिति स्फोटो वर्णाभिव्यंग्यः, स्फुटीभवत्य-स्मादर्थ इति स्फोटशब्दार्थ मुभयथाप्याहुः । एवं पदाभिव्यंग्य व्यक्ति-स्फोटपुरस्कारेण वाक्याभिव्यंग्यजातिस्फोटोऽपि न व्याकुप्यति । अनेक-वर्णानां शक्ततावच्छेदकतापेक्षयैकस्यैव जातिरूप स्फोटत्वस्य शक्तता-वच्छेदकत्वकल्पने लाघवमत एव शब्दानां जातिरेव प्रवृत्तिनिमित्तमिति तार्किकाः वदन्ति । तदुक्तं भगवता हरिणा—

पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च ।
वाक्यात्पदानामत्यन्तं प्रविवेको न कश्चन ।।
वाक्यस्फोटोऽति निष्कर्षे तिष्ठतीति मतार्थिभिः ।

अत एव "ध्वनिरिति समाम्नात इत्यनेनैतस्य निगमसिद्धत्वम्, बुधैरिति वैयाकरणैरिति च काव्यप्रकाशकाराः ।

अथ "घटेन जलमाहर" इति वाक्यश्रवणं विना घटकरणक जलाहरणस्य शाब्दबोध वारणाय प्रत्येकवर्णज्ञानसहिचरमवर्णज्ञानत्वेन कारणतावक्तव्या । एवं सति द्वितीयवर्णस्य ज्ञानकाले प्रथमवर्णस्य नाशा-देवं क्रमेण चरमवर्णज्ञानकाले पूर्वपूर्ववर्णज्ञानानां नाशात् कथं शाब्द-बोधः । तथा विशृंखलिततत्तद्वर्णज्ञानात्तादृशज्ञानजन्यसंस्काराद्वा शाब्द-बोधापत्तिश्च । अत एव वैयाकरणानां रीत्या घटकरणकजलाहरणस्य शाब्दबोधं प्रति स्फोट एव कारणं न तु तत्तद्वर्णज्ञानानां तादृशज्ञानजन्य-संस्काराणां वा शाब्दबोधे कारणता । स्फोटत्वं च यादृशयादृशानुपूर्वी-विशिष्टचरमवर्णज्ञानान्तरं घटकरणकजलाहरणप्रतीतिर्जायते तादृश-चरमवर्णज्ञाननिष्ठोऽसाधारणजातिविशेषः । स तु घटकरणकजलाह-रणविषयकशाब्दबुद्धित्वावच्छिन्नजन्यत निरूपिताजनकतावच्छेदकतया-सिद्धः ।

न च न्यायमतसिद्धतादृशानुपूर्व्यवच्छिन्नचरमवर्णज्ञानस्यैव कार-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

णत्वं कथं न स्वीक्रियते, कृतं स्फोटरूपस्वतन्त्रंधर्मस्वीकारेणेति वाच्यम् । आनुपूर्वीघटित धर्मस्य कारणतावच्छेदकत्वे गौरवात् ।

तथा हि:- घकारोच्चारणाव्यवहितोत्तरोच्चारणघटितानुपूर्वी-शरीरे, तद व्यवहितोत्तरत्वं नाम तत्क्षणध्वंसाधिकरणक्षणध्वंसानाधिकरणत्वे सति तत्क्षणध्वंसाधिकरणत्वरूप, एतादृशानन्ताव्यवहितोत्तरत्वघटितगुरुधर्मस्य कारणतावच्छेदकत्वप्रसंगः ।

एवं "घटेन जलमाहर" इति, "जलं घटेनाहर" इति च द्विविधानुपूर्व्यवच्छिन्नस्य कारणत्वे परस्पर व्यभिचारवारणाय कारणविशिष्टमपि कार्यतावच्छेदकैर्निवेशनीयमिति कार्यतावच्छेदकेऽपि महागौरवप्रसंगः । अत एव वैयाकरणानां मतमेव साहित्याचार्यैरप्यंगीकृतम् ।

वर्णवादमेवार्थबोधे प्रमाणीकुर्वद्भिः तार्किकादिदर्शनपरमाचार्यैः स्फोटवाद आपाततः प्रध्वस्तकल्पइव प्रतिभाति । तथा हि स्फोटसिद्धि-न्यायविचारे- (१७ - श्लोक)

"ननु दृष्टं परित्यज्य सर्वथा दृष्टिमार्गजम् ।
कुर्वन् मृगयते नूनं पिपासुर्मृगतृष्णिकाम्" ।। इति ।

पूर्वपक्षिणां प्रश्नः । "तस्मादन्ये स्थायिनः संस्काराः कल्प्याः । तस्माद्वर्णातिरिक्तः शब्दः कल्प्य इति बहवप्रमाणकमापन्नमिति शास्त्रदीपिकायां पार्थसारथिमिश्राः । न्यायकौस्तुभकृतापि तार्किकयुक्तिर्निराकृता । एतत्प्रसंगे- "शब्द इति चेन्नातः (१।३२८) इत्यादौ ब्रह्म सूत्रे भाष्यम्, "प्रतीत्यप्रतीतिभ्यां न स स्फोटात्मकः शब्द" इति सांख्यसूत्रे वृत्तिश्च-

"यथाग्नेयादिकर्माणि क्रमवर्त्तीनि सन्त्यपि ।
संहृत्य कुर्वते कार्यमेकं वर्णास्तथैव नः ।।

इति श्लोक वार्तिकम्-

"यद्वा प्रत्यक्षतः पूर्वं क्रमज्ञातेषु यत्परम् ।
समस्तवर्णविज्ञानं तदर्थज्ञानकारणम्" ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति शास्त्रदीपिका "नार्थस्य वाचकः स्फोटो वर्णेभ्योऽव्यतिरेकतः" इत्यादिमीमांसा ग्रन्थोऽपि, निपुणमालोचनीयः ।

परन्तु नैतत्सम्यग्विचारसहम् । यदि तावद्वैयाकरणमतं धीरमालोच्यते तदा वेदान्तादि दर्शनप्रतिपादितापत्तिर्दूरापास्ता । अत्राकँ "तस्माद्यश्चोभयोः" समोदोषः न तेनैकश्चाद्यो भवतीति न्यायान्नतिरिक्तस्फोटकल्पनावकल्पत इति चेत् तदेतत्कुशकाशावलम्बनकल्पनं विकल्पानुपपत्तेः "तस्माद्वर्णानां वाचकत्वासम्भवात् स्फोटोऽभ्युपगन्तव्यः" इत्यन्तः पाणिनिदर्शनप्रस्तावोत्तथः सर्वदर्शनसंग्रह एव प्रमाणमित्युक्तमतिगहनगहनक्षोदक्षेमेण ।

अत्र वेदान्तिनां मतानुसारेण "शब्द इति चेन्नातः प्रभवात् प्रत्यक्षानुमानाभ्याम्" (१।३।२८) इत्यत्र "सत्यपि समस्तवर्णप्रत्यवमर्शे यथा क्रमानुरोधिन्य एव पिपीलिकाः पंक्तिबुद्धिमारोहन्ति, एवं क्रमानुरोधिन एव वर्णाः पदबुद्धिमारोहन्ति । तत्र वर्णानामविशेषेऽपि क्रमविशेषकृता पदविशेषप्रतिपत्तिर्न विरुध्यते" इति शारीरके भगवच्छङ्करपादाः ।

यथा तथा वास्तु । उभयथापि व्यक्तिरपेक्ष्यते । अयमेव काव्यप्राणभूतोध्वनिः । रसश्च तदात्मा । केचित्तार्किकाः, भगवान् व्याडिश्च "व्यक्तिरेव पदार्थः" इति । जातिरेव पदार्थ इति मीमांसकसिद्धान्तमेव स्वीकृत्य भगवता भाष्यकारेणापि "किं पुनराकृतिः पदार्थ आहोस्विद्रव्यमिति पदार्थनिर्णयपरे भाष्ये पञ्चमाह्निके ।" जात्याकृतिव्यक्तयः पदार्थः "इत्येव साधीयानिति तार्किकचूडामणयो महामहोपाध्यायाः गदाधरभट्टाचार्यपादाः । परं ब्रह्मतत्त्वं सर्वशब्दार्थः" इति पाणिनिदर्शनप्रस्तावे जरदद्वैतिमतानुवादं कृत्वेव पन्नगवीमतानुसारी माधवाचार्याः।

चतुर्धा पदार्थप्रपञ्च इति वैयाकरणानामपि मतम् । षोढा भेदोऽपि साहित्याचार्येण जयदेवेनापि दर्शितः । तत्सर्वमेव ध्वनिकारमतानुयायिनां मम्मटभट्टानां काव्यप्रकाशे विमृष्टम् । "संकेतितश्चतुर्भेदो जात्यादिर्जातिरेववा" इत्यादिकारिकायाः प्रदीपोद्योतादिषु व्यक्तम् ।

दण्डिनां काव्यशरीरलक्षणस्य सूक्ष्मपर्यालोचनया ज्ञायते यत्सोऽपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्फोटवादी । सर्वेऽपि काव्यत्वस्य शब्दवृत्तित्वमिच्छन्तः, वाक्यवृत्तित्वं वेच्छन्तः स्फोटवादिनः ।

काव्यत्वस्य शब्दार्थोभयव्यासङ्गवृत्तित्वं भामह–सम्मटादीनां मते । शिष्टं ध्वनिसिद्धान्तसम्मतकाव्यशरीरलक्षणविश्लेषणावसरे वक्ष्यामः । काव्ये रसाभिव्यक्तये साहित्यव्यापारस्यैवावश्यकतेति "संयोगाद्रसनिष्पत्तिः" इति भारतागतमतमेव प्रकृतम् । ध्वनिसिद्धान्तानुसारिरसाभिव्यक्तिप्रणाल्या सविशेषनिर्विशेषोभयोरपि रसयोरभिव्यक्तिरिति ध्वनिकृत्समयः । ध्वने नित्यतां नित्यतापि विचारे साहित्याचार्याणामपिनिवेशाभावः । अत एवानन्दवर्धनाचार्येणापि ध्वनिरेव काव्यस्यात्मेत्युक्तम् न तु स्फोट इति । काव्यायोकाव्ययोरपि व्यंग्यव्यंजकत्वेन ध्वनिशब्द व्यपदेश्यत्वम् ।

१२. व्यापारप्राधान्ये काव्यधीः–

ध्वन्यालोककर्त्तुराचार्याभिनवगुप्तपूर्वभाविनां भट्टनायकाचार्याणां मते काव्येषु व्यापारस्यैव प्राधान्यं भवति । तन्मते वाङमयं त्रिविधं शब्दप्रधानं अर्थनिष्ठं व्यापारप्रधानञ्च । तदुक्तम्–

शब्दप्राधान्यमाश्रित्य तत्र शास्त्रं पृथग्विदुः ।
अर्थतत्त्वेन युक्तं तु वदन्त्याख्यानमेतयोः ।।
"द्वयोर्गुणत्वे व्यापारप्राधान्ये काव्यधीर्भवेत्" ।। इति ।

अर्थात् तन्मते प्रौढोक्त्याभ्युपगतस्य व्यंग्यव्यापारस्य काव्यांशित्वम् । न्यग्भाविशब्दार्थस्वरूपस्य व्यापारस्यैव प्राधान्यमस्ति । एवं कविकर्मरूपस्य व्यापारस्य प्राधान्ये सत्यपि काव्यं त्र्यंशम् । तथा च–

"अभिधा भावनाचान्या तद्भोगीकृतिरेव च ।
अभिधाधामतां याते शब्दार्थालङ्कृती ततः ।
भावनाभाव्य एषोऽपि शृंगारादिगणो मतः ।
इत्यंशद्वयस्य विषयं प्रतिपाद्य,
"तद्भोगीकृतिरूपेण व्याप्यते सिद्धिमान्नरः" ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति तृतीयोंऽशः सहृदयगतः, तदंशद्वय चर्वणात्मा—

"दृश्यमानाथवा मोक्षे यात्यङ्गत्वमियं स्फुटम्"

इत्युक्त्या परब्रह्मास्वादसहोदरसरूपः काव्यार्थ एव विश्रान्तिधामतया प्रोक्तः। एवं काव्येऽभिधानामकं व्यापारद्वयोत्तीर्णस्य रसचर्वणात्मकस्य भोगापरपर्यायोव्यापार एव प्रधानम्। भट्टनाकाचार्यस्यानन्दवर्धनपूर्वभावित्वं रूय्यकाभिमतमिति प्रतिभासते।

आनन्दवर्धनः पुनरभिधातात्पर्यलक्षणाख्यव्यापारत्रयोत्तीर्णस्य ध्वननद्योतनादि शब्दाभिधेयस्य व्यञ्जनाव्यापारस्यावश्यमभ्युपगम्यत्वाद् व्यापारस्य च वाक्यार्थत्वाभावाद्वाक्यार्थस्यैव च व्यंग्यरूपस्य गुणालङ्कारोपस्कर्त्तव्यत्वेन प्राधान्यात् विश्रान्तिधामत्वेनात्मत्वं सिद्धान्तितवान्।

व्यापारस्य विषयमुखेनैव स्वरूपप्रतिलम्भात् प्राधान्येन प्राधान्यात्स्वरूपेण विदितत्त्वाभावाद्विषयस्यैवात्मेति व्यवहारादियोग्यत्वम्। तस्मात् विषय एव व्यंग्य नामा जीवितत्वेन वक्तव्यः। यस्य गुणालङ्कारकृत चारुत्वपरिग्रहसाम्राज्यम्। रसादयस्तु जीवितभूताः नालङ्कारत्वेन वाच्याः। अलङ्काराणामुपस्कारकत्वेन रसादीनां च प्राधान्यादुपस्कार्यत्वम्। तस्माद् व्यंग एव वाक्यार्थीभूतः काव्यजीवितमित्येष एव पक्षोवाक्यार्थविदां सहृदयानामावर्जकः। व्यञ्जनव्यापारस्य सर्वैरनुपहतत्वात्तदाश्रयेण च पक्षान्तरस्याप्रतिष्ठानात्। काव्यार्थश्च शब्दार्थयोर्गुणभावेन व्यञ्जनाख्येन व्यारारेणैवास्वाद्य इति ध्वनिकृतां सिद्धान्तः। तल्लक्षणम् तु—

विरतास्वभिधाद्यासु ययार्थो बोध्यते परः।
सावृत्तिर्व्यञ्जनानाम शब्दस्यार्थादिकस्य च ॥

एवं व्यक्तिवादिनां नये "रसः काव्यार्थः" इति स्थितम्। स एवालङ्कार्यः। रसः पदार्थो वा वाक्यार्थो वेत्यपि विचारो मतिगोचरी भवति। "शब्दबुद्धिकर्मणां विरम्यव्यापाराभावः" इति न्यायेनाभिधालक्षणातात्पर्याख्यासु तिसृषु वृत्तिषु स्वंस्वमर्थं बोधयित्वोपक्षीणासु यया-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ऽन्योव्यंग्योऽर्थो बोध्यते स शब्दस्यार्थस्य प्रकृतिप्रत्ययादेश्च वृत्तिर्व्यञ्जनध्वनन–गमन–प्रत्यायनादिव्यपदेशविषयाव्यञ्जना नाम ।

अभिधायाः सङ्केतितार्थमात्रबोधनविरताया न वस्त्वलङ्काररसादिव्यंग्यबोधने क्षमत्वम् रसादिरूपाणामर्थानामसङ्केतितत्वात् । न हि विभावाभिधानमेव तदभिधानंरसस्य तदेकरूप्यानङ्गीकारात् । न हि खलु विभावाद्या एव रसा इति केनाप्युच्यते । यत्र च स्वशब्देन तदभिधानं तत्र प्रत्युत दोष एवेत्युक्तत्वात् । क्वचिच्च "वीररसोऽयम्" "शृङ्गररसोऽयम्" इत्यादौ स्वशब्दाभिधानेपि न तत्प्रतीतिः, तस्य स्वप्रकाशानन्दरूपत्वात् । तात्पर्यावृत्तेस्तु संसर्गमात्रबोधेनोपक्षीणत्वान्न रसार्थबोधने सामर्थ्यम् । तस्मात्–

"वृत्तीनां विश्रान्तेरभिधातात्पर्यलक्षणाख्यानाम् ।
अङ्गीकार्या तुर्या वृत्तिर्बोधे रसादीनाम् ।।"

तस्मात्काव्यानन्दरसबोधे वाच्यवाचकलक्ष्यलक्ष्यकभावातिरक्तः व्यङ्ग्यव्यञ्जकभावोऽङ्गीक्रियते । "व्यापारप्राधान्ये काव्यधीरितिभट्टनायकेन यदुक्तं तत्र व्यापारो यदि व्यञ्जनाख्यस्तन्नापूर्वं किञ्चित् । भोगस्तु व्यक्तिरेवेति रसगङ्गाधरकाराः ।

अयं सम्बन्धः वाच्यवाचकभावाल्लक्ष्य–लक्षकसम्बन्धाच्च: विलक्षणः । शब्दार्थसम्बद्धोऽसम्बद्धश्च नानाविधोऽर्थोऽनेन बोध्यते । व्याकरणदर्शनस्य त्वयं सम्बन्धः प्राणभूत एवास्ते । सम्बन्धमेवमन्तरेण व्याकरणशास्त्रजीवानुभूतस्य स्फोटतत्वस्य प्रकाशनमेव न सम्भवति । यदुक्तं भगता व्याडिना–

शब्दस्य ग्रहणे हेतुः प्राकृतो ध्वनिरिष्यते ।
स्थितिभेदे निमित्तत्वं वैकृतः प्रतिपद्यते ।।

अत एव भगवता हरिवृषभेणाऽपि–

"प्रत्येकं व्यञ्जका वर्णा भिन्ना वाक्यपदेषु ये"

इति सुष्टूक्तम् । अत्र व्याडिमतानुसारेण प्राकृतध्वनेः स्फोटस्य व्यञ्जकत्वं स्पष्टीभवति । द्वितीयरीत्या प्रत्येकं वर्णाः पदस्फोटं वाक्यस्फोटं च व्यञ्जयन्ति । "प्राकृतस्य ध्वनेः कालः शब्दस्येत्युपचर्युते" इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वचनात् प्राकृतध्वनिरेव वर्णः। यतः स एव स्फोटस्य व्यञ्जकस्ततस्तदीयो मात्राद्विमात्रात्रिमात्रात्मकश्चकालः स्फोटस्यारोपितः कालो भवति। स्फोटस्तु वस्तुतोदिग्देशकालाद्यनवच्छिन्न एव, विभुनोऽपरिमितत्वेनानवच्छिन्नत्वात्। एतेन–वैयाकरणानां मते ध्वनेर्व्यञ्जकत्वं सुस्पष्टमायाति। तेषां मतानुसारेण स्फोटध्वन्योर्व्यंग्यव्यञ्जकभावः सम्पद्यते।

१३. व्यञ्जनाविषये भाष्यकारमतम्–

"उपसर्गाः क्रियायोगे" इति सूत्र भाष्ये क्रियायोग इत्यनेन क्रिययासहोपसर्गस्य योगो व्यङ्ग्यव्यञ्जकभावोऽभ्युपगतः। न तु वाच्यवाचकभावः, स तु क्रियया सह धातोरेव। किञ्च, "भूवादयोधातवः" इति सूत्रभाष्ये "क्रियाविशेषक उपसर्गः पचतीति क्रिया गम्यते, तां प्रत्युपसर्गो यथान्वयव्यतिरेकाभ्यां प्रत्ययोऽर्थबोधकः, तथा ताभ्यामेव क्रियागतविशेषद्योतकउपसर्गः, क्रिया वाची धातुरेवेत्युक्तम्। क्रियाविशेषकश्च क्रियागतवैशिष्टय द्योतकएवातएव उपसर्गाणां द्योतकत्वमेवेति साहित्यविदां निर्णयः।

किञ्च भूवादि सूत्रस्य "क्रियावाचिनो भ्वादयो धातुसंज्ञाः स्युः" इत्यर्थे "क्रियावाचिनः" इत्यंशो व्यञ्जनागम्य एव। अन्यथा वादयो भ्वादयो धातुसंज्ञा इमि प्रथमकक्षा, ततश्चादि शब्दस्य प्रकारवाचितया वाप्रकाराभ्वादयोधातुसंज्ञा इति द्वितीयकक्षा, ततश्च "प्रतियोगितावच्छेदकव्यापकीभूतेन धर्मेण सादृश्यं गृह्येत" इति नियमेन क्रियावाचिनो भ्वादय इत्याद्यर्थोलभ्यते। प्रतियोगितावच्छेदकत्वव्यापकीभूतेन क्रियावाचित्वेन सादृश्यस्य ग्रहणात्। "अथवा नान्तरेण क्रियां भूतभविष्यद्वर्त्तमानकाला व्यज्यते" इति भगवान् पतञ्जलिरपि "व्यज्यन्ते" इति वक्ति, "व्यञ्जनया बोध्यन्ते" इति स्पष्टमेवाह।

वैयाकरणानां नयेध्वनिर्व्यञ्जक एव, साहित्यनये तस्य व्यंग्यत्वमपीतिविशेषः साहित्यनये शब्दार्थयोः शक्तिपार्थक्यं भेदविवक्षयाङ्गीक्रियते। शब्दशक्तिमूलत्वेन व्यञ्जनाया शाब्दत्वमर्थशक्तिमूलत्वेनार्थ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वञ्च । "सर्वेषां प्रायशोऽर्थानां व्यञ्जकत्वमपीष्यते" इति मम्मटोक्तिस्वारस्यात्, विभावादिरूपाणामर्थानां व्यञ्जकत्वेनेष्यमाणत्वात् । एतेन वैयाकरणानामपेक्षया साहित्यशास्त्रकाराणां मते शक्तिविषयेऽपि विशेषो द्रष्टव्यः । व्यञ्जनैव काव्यवृत्तिरिति सारम् ।

१४. शक्तिस्वरूपविमर्शः–

श्रीमदानन्दवर्धनाचार्येण साहित्यशास्त्रे ध्वनिसिद्धान्तः प्रतिष्ठापितः ततःप्रभृति शब्दार्थयो सम्बन्धमधिकृत्य विचाराः प्रावर्त्तन्त । शक्तिविषयकविचारस्य सिद्धान्तस्तु ध्वन्यलोककृतामेव परन्तु तस्य व्याख्यायां लोचनकारेण मीमांसकाः सबहुमानमाघूर्णिताः । यद्यपि भामहाचार्येणापि शक्तिमीमांसाबीजानि काव्यालङ्कारस्य न्यायपरिच्छेदे चर्चितानि, दण्डिना तु मौनमेवास्थितम्, परन्तु भट्टनायकेनाभिधातिरिक्तस्य भोगापरपर्यायस्य व्यापारस्य प्राधान्यमुक्तम् । शब्दार्थयोर्भोग्यभोजकभावसम्बन्धस्याप्रसिद्धत्वादपि तदसाम्प्रतम् । तदपेक्षया व्यङ्ग्यव्यञ्जकभावस्य समूलत्वेन, व्यापारस्य च वाक्यार्थत्वाभावेन साहित्यविद्भिः व्यञ्जनायाः शक्तिरूपत्वं रसबोधसामर्थ्यवत्त्वञ्चाङ्गीकृतम् ।

काव्ये केचन एव शब्दाः प्रयोक्तव्याः, ये न रूक्षाः, नारुन्तुदाः नवोद्देश्यप्रतीतिप्रतिबन्धकाः, न वा पर्युषिताः । घण्टानुरणनवन्नवनवार्थनिःस्यन्दिनो मधुरा लौकिकचमत्कारिणो वा समुचिता गुणालङ्कारादि वैशिष्ट्याल्लोकविलक्षणा शब्दाः काव्ये प्रयोक्तव्याः, तदुक्तमानन्दवर्धनाचार्येण–

"सोऽर्थस्तद्व्यक्तिसामर्थ्ययोगी शब्दश्च कश्चन ।
यत्नतः प्रत्यभिज्ञेयौ तौ शब्दार्थौ महाकवेः" ॥

एवमेव कुन्तकाचार्येणापि–

"शब्दो विवक्षितार्थवाचकोऽन्येषु सत्स्वपि ।
अर्थः सहृदयाह्लादकारि स्वस्पन्दसुन्दरः" ॥

एवं व्यञ्जकशब्दस्यैव काव्ये प्राधान्याद् तदुपाधिविशिष्टस्यैव व्यञ्जकत्वाद् व्यञ्जनायाश्चाभिधा–लक्षणामूलकत्वात्तस्य च शब्दशक्ति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रूपत्वेनालङ्कारिकैरपि स्वीकृतत्वादनपह्नवनीयत्वम् । वाचकलक्षकान्यत-तर एव शब्दोऽव्यञ्जको भवति । अभिधाद्याः उपाधयः । शक्तिरेव द्विधा जातिरूपा, उपाधिरूपा च । सा च शक्तिरतिरिक्तपदार्थः इति वाक्य-विदां समयः ।

"शक्तिरतिरिक्तः पदार्थः"

शक्तिः कवित्वबीजरूपः संस्कारविशेषः । यां विना काव्यमेव न प्रसरेत् । प्रसृतं वोपहसनीयं स्यात् । अर्थात् "संख्यावान् पण्डितः कविः" इति कोषरीत्या संख्यावदर्थकविपदप्रवृत्तिनिमित्तभूतः संस्कार-विशेषः भावनाख्यः प्रतिभानामा, प्रणिधानसत्कृते चेतसि यो झटिति उद्बुध्यतेक्लिष्टपदपदार्थगोचरः संस्कारः । सा च प्रतिभा, काव्यघटना-नुकूलशब्दार्थोपस्थितिरूपा । तदुक्तम्–

"मनसि सदा सुसमाधिनि, विस्फुरणमनेकधाऽभिधेयस्य
अक्लिष्टानि पदानि च विभान्ति यस्यामसौ" शक्तिः ।
"सरस्वती स्वादुतदर्थवस्तु निष्यन्दमाना महतां कवीनाम् ।
अशेषसामान्यमभिव्यनक्ति परिस्फुरन्तं प्रतिभाविशेषम्" ।
"स्मृतिस्त्वतीतविषया मतिरागामिगोचरा ।
बुद्धिस्तात्कालिकी ज्ञेया प्रज्ञा त्रैकालिकी मता ।।
प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता ।।

सैव काव्यशक्तिः । तदनुग्रहादेव शब्दार्थसाहित्यावगमः । तस्या एव शक्तेरुपाधिविशेषो व्यञ्जना । सैवार्थशक्तिरपि । अभिधालक्षणे तदुल्लासे सहकारिण्याएव । सा च पदगोचरा, अर्थगोचरा चेतिद्विविधा । द्विविधापि कवेरपेक्षिता । पदवाक्यतदर्थानां प्रतिसन्धानेन सन्दर्भरच-नायामुपयुज्यते । सहृदयस्य तु काव्यैकदेशीभूतस्यार्थस्योद्भवाय तद्-गोचरा केवलमपेक्ष्यते । सैवकारणीकृतविभावादिस्मारयित्वा तदुपबृंहितं स्थायिभावमुल्लासयति सैव "काव्यशक्तिः" (व्यञ्जना) काव्यस्योद्भवे निर्माणे समुल्लासे च कारणम् । व्युत्पत्त्यभ्यासादीनामुत्तेजकत्वेन, तत्सा-हकारित्वेनेवागतार्थता । सैववर्णपद–वाक्य–प्रकरणार्थाद्यकाश्रयाद्विविध-विद्योपाधिमयी अखण्डापि व्यवहारे शब्दान्वयव्यतिरेकानुबन्धिनी,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

च शाब्दी, आर्थी चेति व्यपदिश्यते । वाचकलक्षकशब्दानां लोकव्यवहारेऽन्यत्र प्रसिद्धत्वेन "विशिष्ट शब्दार्थौ काव्यम्" इत्युच्यते । विशिष्टार्थवती पदावलीकाव्यमित्यपि सुवचमेव । वैशिष्ट्यं च सम्बन्धविशेषकृतम् । स च व्यंग्यव्यञ्जकभावरूप एव । व्यंग्यव्यञ्जकाभ्यामेव सुप्रयुक्ताभ्यां महाकवित्वलाभ इत्यानन्दवर्धनाचार्यः काव्ये शब्दार्थयोर्व्यंग्यव्यञ्जकभावातिरिक्तसम्बन्धस्यानङ्गीकारात् । अत एव ध्वन्यालोके, ध्वनेरेव प्रधानगुणभावाभ्यां, ध्वनिर्गुणीभूतव्यंग्यत्वेद्विविधमेव काव्यमिति निर्णीतिम् । पदपदार्थवाक्यार्थप्रकरणप्रबन्धरूपं काव्यं व्यञ्जकम्, उपक्रमोपसंहारन्यायेन तदात्मभूतोऽङ्गीरस एव व्यंग्यार्थः । यथा रामायणे, महाभारते चाप्रबन्धं शुष्केकाष्ठेऽग्निरिव व्याप्तो करुणाशान्तरसौ । इतिवृत्ततद्घटकशब्द–तदर्थ–गुणालङ्कारादीनामपि व्यञ्जकत्वेनैव तत्त्वमिति व्यवस्थापितत्वात् तत्रापि कविप्रतिभा सञ्चारेणैव सहृदयानामुल्लासोनुभूयते । विनेयेभ्योऽपदेशस्तु रसास्वादनान्तरप्रभवः । काव्यार्थबोधरसास्वादयोरन्तराले तदनवगमात् । तदुक्तं भामहाचार्येणापि–

> "स्वादुकाव्यं रसोन्मिश्रं शास्त्रार्थमुपभुञ्जते ।
> प्रथमालीढमधवः पिबन्ति कटुकौषधम् ।।

काव्यवाक्ये त्रिधा पदावली विद्यते । सा च–

(१) कार्यबोधिका
(२) कारणबोधिका
(३) सहकारिबोधिका

तत्र कार्यबोधकपदावलीमध्ये प्रसरन्ती व्यञ्जना विभावनाशब्देन व्यपदिश्यते । कारणबोधकपदावलीमध्ये विराजमाना सानुभावनाशब्देनाभिधीयते । सहकारिबोधकपदावलीमध्ये च सैव समुल्लसन्ती "सञ्चारण शब्देनागमतत्त्वविदां मूर्धन्यैरुच्यते । सैव साधारणीकृतविभावादिपरामर्शपुरःसरं काव्यार्थं भावयन्ती सहृदयान् सरसीकरोति ।

सा व्यञ्जनैव व्यक्तिर्भग्नावरणा–चिन् । चिदेव रसः । तस्मात्काव्यार्थ शक्तिर्व्यञ्जना, काव्यशक्तिश्च प्रतिभेति संक्षेपः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सा च स्वतन्त्रता । चितिः स्वतन्त्रा विश्वसिद्धि हेतुः । एवं काव्यसिद्धिहेतुः कवित्वबीजभूता चिद्रूपाशक्तिः स्वतन्त्रा । प्रतिभापराधीनमेव काव्यम् । अत एव दाहानुकूलायाः शक्तिरिव काव्यघटनानुकूलायाः शक्तेरतिरिक्तत्वं विज्ञायते ।

मीमांसकानामपि रीत्या शक्तिरतिरिक्तः पदार्थः । विभावनानुभावनासञ्चारणानां सखण्डानां यथावत्संयोगादेव रसनिष्पत्तिर्भवति तदुक्तम्–

विभावेनानुभावेन व्यक्त सञ्चारिणा तथा ।
रसतामेति रत्यादि स्थायीभावः सचेतसाम् ।।

व्यक्तः अर्थात् दध्यादिन्यायेन व्यक्तिविषयीकृतः । भरतमुनिना प्युक्तम्–

"काव्यार्थसंश्रितैर्विभावानुभावव्यञ्जितैः ।
एकोनपञ्चाशद्भावैरभिनिष्पद्यन्ते रसाः" ।।

"अष्टौभावाः स्थायिनः, त्रयस्त्रिंशद्व्यभिचारिणः । अष्टौ सात्विकाः एते काव्यरसाभिव्यक्ति हेतवः" । इति । इत्थं काव्यशक्तिः प्रतिभा, काव्यार्थ–वृत्तिश्च व्यञ्जनेति स्थितम् ।

१५. प्रतिभा–स्वरूपमीमांसा (काव्यशक्तिः)

काव्यशक्तिरेव मम्मटस्य शक्तिः सैव "प्रतिभाविशेषः" इत्यानन्दवर्धनाचार्याः । प्रायोऽखिलैरालङ्कारिकैर्विभिन्नशब्दैर्व्यवहरद्भिः तस्या काव्यकारणत्वमङ्गीक्रियत एव । प्रतिभादिज्ञानार्थकपदानां स्थूलतः सर्वत्र समानेऽपि प्रयोगे दर्शनभेदेन पदार्थभेदोऽपि सूक्ष्मधिया विभाव्यते । तत्र काव्यघटनानुकूलशब्दार्थोपस्थितिः प्रतिभेति रसगङ्गाधरे पण्डितराजानां मतमतीव मृग्यम् । प्राय साहित्यशास्त्रीयानां पदार्थानां स्फुटतया प्रतिपादनेऽद्यावध्यवतीर्णात् सर्वानपि साहित्यमीमांसकानयमतिशेते । यस्य रसगङ्गाधरस्य इदमेवास्ति वैशिष्ट्यं यत्साहित्यशास्त्रे साहित्यमात्रे समुपयोगिनः पदार्थाः, कतिपयै परिभाषिताः, बहवश्चान्यत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शास्त्रे व्यवहृताः एवं यथायथमुपयोजिताः । तथा च काव्यकारणत्व-विवेचने पण्डितराजः–

"तस्य च कारणं कविगता केवला प्रतिभा । सा च काव्यघटनानुकूलशब्दर्थोपस्थितिः तद्गतं च प्रतिभात्वं काव्यकारणतावच्छेदकतया-सिद्धो जातिविशेषउपाधिरूपं वाखण्डम् अर्थात् "अखण्डं प्रतिभात्वं जातिः, सखण्डश्चेदुपाधिः" ।

तत्र "काव्यघटनानुकूलः" इत्यादिः प्रतिभायाः परिचायकमात्रम् न तु कव्यघटनानुकूलशब्दार्थोपस्थितित्वं कारणतावच्छेदकम्, नाना-त्वात् । काव्यघटनानुकूलत्वञ्च काव्यप्रयोज्यायाश्चमत्कृतेः परम्परया प्रयोजकत्वम् तस्मात् काव्यघनानुकूलशब्दर्थोपस्थितित्वेन कारणत्वे कार्यतावच्छेदक काव्यत्वस्य कारणतावच्छेदककुक्षिप्रवेशेनान्यो-न्याश्रयात्कारणताग्रहो न स्यात् । शब्दार्थोपस्थितित्वेन कारणत्वे प्रतिभाया अकाव्यस्याप्युक्तादेव, काव्यत्वप्रयोजकत्वेन व्युत्पत्यादीनां सहकारित्वमिति वन्दन्तः परास्ता ।

जातित्वपरिभाषायाः सर्वतन्त्रात्मितैकरूपत्वाभावात् "उपाधि रूपं वेति" विकल्पान्तर प्रस्तावः । उपाधिश्च जातिसमशीलो धर्म-विशेषः । सोऽपि जातिवत् "अखण्डम्" इति पाठस्तु अपपाठः । उपाधेः सखण्डत्वे काव्यघटनादिधर्माणां तच्छरीरप्रवेशे पूर्वोक्तदोषापत्तेः । सर्वत्रैव सामान्यकार्यकारणभावग्रहे कार्यतावच्छेदक कारणतावच्छेदकयो– रुपाधित्वं जातित्वं वाऽवश्यमपेक्ष्यते । तदन्तरेण सामान्यकारणताया असम्भवात्

नागेशमतानुसारेणोपाधीनां सखण्डत्वमेव अखण्डोपाधीनां जाति-त्वमेव मञ्जूषायां तेनोक्तन् । तन्मते सामान्यत्वं आकाशत्वञ्च जातिरेव । अत एव प्रतिभायास्तन्मतेप्युपाधित्वेन सखण्डत्वमिति, परन्तु प्रतिभात्व-मखण्डोपाधिरेवेति पण्डितराजानां मतम् ।

साहित्यशिरोमणय एकत्रिकयापि दर्शने वासनयाऽन्यत्र चान्यथा पदानि प्रयुञ्जते । दर्शनेष्वपि विशकलित विवेचनाशीलस्य नव्यन्यायस्य कतिपय शब्दाः निःसन्देहार्थतयाधिकं नव्याः प्रयुञ्जाना दृश्यन्ते । एवञ्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नव्यनैयायिक रीतिमाश्रित्य स्मृतिमात्रे प्रसिद्धस्योपस्थिति शब्दस्य न तस्मिन्नर्थेऽत्र । प्रयोगोऽस्ति प्रत्युतात्रोपस्थितिशब्दस्य ज्ञानमात्र, मानसप्रत्यक्षं वार्थः । स्मृतीनां नूतनत्वासम्भवेन, नूतनानामेव काव्य-घटनानुकूलत्वात् । एवञ्च प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता "अपूर्व-वस्तुनिर्माणक्षमाप्रज्ञा सा" इति लोचनकाराः । सांख्यदर्शने बुद्धिर्नामान्तः करणतत्वम् । तस्यैव विषयाकारपरिणामोधर्मः ज्ञानम् । निरुक्तवक्ये शीघ्रतया नवनवविषया कारणपरिणतिर्नवनवोन्मेषशब्देनोच्यते । नेयं काव्यधर्मानुकूलैवापि तु नीत्यादि सर्वविद्यानुकूला । "बुद्धिमान" "शक्तिशाली" "समर्थः" इत्यादि लोकव्यवहारेष्वपि प्रतिभायाः शक्ति-पदेन व्यवहार प्रसिद्धः ।

तथा च प्रतिभापदप्रवृत्तिनिमित्ती भूतो बुद्धेर्नवनवन्मेषो न स्वाभा-विकोऽपि तु अदृष्टवासनानिमित्तकः । प्राक्तनवासनाविशेषवशाददृष्टव-शाच्च नवनवोन्मेषोबुद्धेः परमस्ति, तत्रापि उन्मेषे कश्चिदस्ति विशेषः । वासना संस्कार इत्यनर्थान्तरम् । संस्कारश्चानुभवजन्योऽनुभवसमान विषयकः स्वानुभवसमानविषयिण्याः स्मृतेर्जनकः । संस्कारवशा-त्स्मृतानां विषयाणां नवनवत्वमपि प्रागनुभूततया न साधु सङ्गच्छते । अदृष्टं चापि स्वकारणापेक्षयाविलक्षणसामर्थ्यवन्न प्राक्तनकवित्वमनुभवं वाऽपेक्षमाणं साधु नवनवोन्मेषकारीति प्रतिभाति । अत एव "शक्ति-र्निपुणताः" इत्यादि काव्यप्रकाशघटक शक्तिपदस्य गोविन्दठक्कुरस्य "प्रदीपे" "संस्कार विशेषः" इति विवरणमुपेक्ष्य विद्वद्वरेण्येन नागोजि-भट्टेन "देवताराधनादिजन्यं विलक्षणादृष्टं शक्नोति काव्यनिर्माणायेति योगाच्छक्तिरित्युच्यते ।" इति रमणीयमुक्तम् ।

नैयायिकानां ज्ञानापरपर्याया बुद्धिर्नतादृक्स्थिरा येन क्रमशः स्व-भावेन सहकारिसाचित्र्येन वा नवनवान् विषयानवगाहेत् । क्षणत्रयेण भंगुरा सा पटविषयिणी जाता न क्षणेन परं परित्यज्य जातु घटविषयत्वं दधाति । नापि तस्याः कश्चिदुन्मेषः सम्भवति । "शब्दबुद्धिकर्मणां विरत्य व्यापाराभावः" इति न्यायात् । पण्डितराजानां प्रतिभापदार्थस्तु सांख्य-रीत्यानवनवोन्मेष पदार्थ इति सुधियां निर्णयः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१६. रुद्रटमतम्–

रुद्रटाचार्यस्तु–

"मनसि सदा सुसमाधिनि, विस्फुरणमेकधाभिधेयस्य ।
अक्लिष्टानि पदानि च यस्यामसौशक्ति ।"
"सहजोत्पाद्या च द्विधा सा भवति ।
उत्पाद्या च कथञ्चिद् व्युत्पत्या जन्यते परया" ।।

इत्याह । "विस्फुरणे विभान्ति" इत्याभ्यां प्रतिभेव निर्दिष्टा । सा च पण्डितराजपरिष्कृतैव न तु कापिलनयसिद्धाबुद्धिः । शक्तिश्च संस्काररूपा, अदृष्टरूपा च । जन्मान्तरीयानुभवजन्यसंस्काररूपा, अदृष्टरूपा च सहजा । ऐहिकोत्कृष्टव्युत्पत्तिजन्या चोत्पाद्या । सहजत्वं तु दण्डिमते नैसर्गिकत्ववदैहिकव्युत्पत्तिजन्यत्वमात्रम् । यद्वा, सहजा–अदृष्टरूपा, उत्पाद्या चेहिकव्युत्पत्तिजन्या ।

अत्राध्यासस्याद्यापि गणना न दृश्यते, तथापि तत्र न्यूनतामावहति । व्युत्पत्तिपदेन लोकशास्त्रादेः, करणयोजनादेश्च व्युत्पत्तेः संग्रहस्यौचित्येन, व्युत्पत्यभ्यासयोरुभयोपि संस्कारे पर्यवसानस्योक्तत्वात् । एवञ्च प्रतिभाकारणं प्रतिभा च क्वचिददृष्टजन्या, क्वचिच्चैहिकव्युत्पत्तिकृतसंस्कार जन्येति प्रायः पण्डितराजमत एव पर्यवस्यति ।

१७. वामनमतम्–

एतन्मतेऽपि "कवित्वबीजं प्रतिभानं, कवित्वस्य बीजं संस्कारविशेषः कश्चिद्यस्माद्विना काव्यं न निष्पद्यते । निष्पन्नं वा हास्यायतनं स्यात्" इत्युक्तम् । प्रतिभानं प्रतिभाजनकम् बीजं संस्कारविशेषः– प्रतिभाद्वारेति शेषः ।

किञ्चिदपि कारणं शब्दार्थोपस्थितिमन्तरा न काव्यं घटयितुं प्रभवतीति प्रतिभाद्वारकत्वं सर्वेषामेवेष्टम् । संस्कारपदेनादृष्टं व्युत्पत्तिप्रभृतिजन्यश्चेति सर्वं संगृह्यते । एवं च वामनमतमपि पण्डितराजमतानुकूलमेव ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१८. मम्मटमतम्–

तदुक्तम्–

शक्तिर्निपुणता लोकशास्त्र काव्याद्यवेक्षणात् ।
काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे ।।

अत्र शक्तिः कवित्वबीजं संस्कारविशेषः । नागेशरीत्या शक्तिरदृष्टपरा । निपुणता व्युत्पत्तिः । यद्यपि क्वचिच्छक्तिः क्वचिच्च व्युत्पत्तिरभ्यासश्च कारणमित्यपि व्याख्यासरणिर्दृश्यते तथापि शक्त्यादि समुदायस्यैव कारणत्वे बहूनां सम्मतिरस्ति । व्युत्पत्तिवादादावपि समुदितत्रय कारणतावादित्वेन मतमिदं गृहीतम् । अत्रापि शक्तिं प्रति क्वचिददृष्टस्य क्वचिच्च निपुणताभ्यासयोः कारणत्वमिति व्याख्यानेऽपि न विरोधः । भीमसेनोऽपि तथैव व्याख्याति । किञ्च "अनन्यवदतां व्याख्याकाराणमपि तथैवाशयः । तस्मात् मम्मटाचार्यमतानुसारेणापि "काव्य-शक्तिः" प्रतिभैवेति, निश्चितम् ।

पण्डितराजस्यापि मतानुसारेण प्रतिभां प्रत्येक समुदितत्रयस्य करणतावादित्वेन मम्मटाचार्यमतमभिप्रेतम् । "न तु त्रयमेव" इत्यादिना प्रतिभां प्रत्येव समुदितत्रयस्य कारणतां स खण्डयति न तु काव्यं प्रति । तत्रत्यरसगङ्गाधरमूलस्वारस्यं शक्त्यादित्रयहेतुतावादिनः "इति" शक्तिमात्र हेतुतावादिनश्च वामनमतपरत्वेनाङ्गीकृत्य सामञ्जसं भवति । तस्य संस्कारमात्र हेतुतावादित्वेन शक्तिमात्रहेतुतावादान्तःपातितत्वान्न-विरोधः ।

इत्थं काव्यशक्तिविषये पण्डितराजमम्मटाचर्ययोर्मतयोः समन्वयेनापि पण्डितराजीयमेव प्रतिभालक्षणमुचितमाभाति ।

काव्यशक्तेरुपाधि विशेषो हि व्यञ्जना । सैव सर्वविघ्नबाधविधुरीकरणनिपुणा काव्यवृत्तिरुच्यते । काव्यार्थस्य तयैव बोद्धुं शक्यत्वात्तस्यैव काव्येषु प्राधान्यं ध्वन्यालोककृता निरूपितम् । सैवार्थशक्तिरिति नाम्नापि व्यपदिश्यते ।

एवं साहित्यसम्प्रदायस्य सिद्धान्तस्थापन परमाचार्याणां मतानां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सूक्ष्मपरिशीलनेनैद्व्यक्ती भवति यत् काव्यस्य धर्माणां तदात्मनश्च मीमांसा परस्पराविरुद्धा श्रुतिस्मृतिपुराणप्रमाणमूला बहुमुखी वर्तते ।

वस्तुतस्तु "सायित्यशास्त्रं" सर्वविद्यापारिषदम् भरतमुनिमारभ्याद्यावधि शास्त्रस्यास्य परम्परा अविच्छिन्ना । रससिद्धान्तस्तूपनिषत्सु वहुविधोऽस्ति अग्निपुराणे विष्णुपुराणे काव्यानां चर्चा विद्यते । नाट्यशास्त्रस्य कर्त्तुर्भरतस्याग्निपुरणे चर्चास्ति । अतः नाट्यशास्त्रस्य प्राचीनता, ऐतिहासिकता च सिद्धैवेत्यत्र नास्ति शङ्कावसरः ।

सर्क्षेषामेव ग्रन्थनां परिशीलनेनैतत्तथ्यं व्यक्ती भवति यत्सर्वैरेवाचर्यैः स्वस्मात् पूर्वभाविनामाचार्याणां तत्कृतीनां मतानि सिद्धन्ताश्चोपस्थाप्यैव स्वं मतमुक्तम् । इतिहास एव मुख्यं काव्यशरीरम् । संस्कृतसाहित्य समुपलब्धानि महाकाव्यानि नाटकानि च श्रुतिस्मृतिपुराणमूलानितीतिहासाख्यातान्येव ऐतिहासिक प्रख्यातसत्कथावस्तूनां हृदयहारि काव्यनिर्माणार्थंमलङ्कारादीनामुपयोगवदर्थव्यक्तो सरसत्वं भवति । काव्यानांम प्रयोजनमेव निर्माणं कविः कुर्यादिति रामायण–महाभात–भागवत्काव्यालङ्कार–काव्यप्रकाशादिषु प्रारम्भे एव निरूपितम् ।

भारतीयसाहित्यशास्त्रेऽर्वाचीनशास्त्रप्रभावगवेषणस्तू बाल चेष्टामात्रम् । तथापि वर्तमानकालिकरीत्या प्लेटोअरस्तूमहोदययोः भरतप्राग्वर्तित्वमभ्युपगस्य ग्रीक साहित्यस्य संस्कृतसाहित्यायर्णम्, ग्रीकसाहित्यदर्शन प्रभावातिक्रान्तता संस्कृतसाहित्यशात्रस्य वदन्ति नाम ।

आधुनिकास्तु साहित्यप्रस्थाने, अन्धगजन्यायेन दन्तपुच्छजठरादिक मिवालङ्कारगुणरीत्यादीनाङ्गितयाख्यापयन्तो भ्रन्ता एव ।

साहित्यशास्त्ररीत्या काव्यमूलं सौन्दर्यमन्तर्बहिर्भेदाभ्यां विभज्यते । काव्यं ग्राह्यमलङ्कारात् सौन्दर्यमलङ्कारः इति वन्दतः काव्यानां वाच्यार्थसौन्दर्यमेव प्राधान्येन परिचिन्तयन्ति । काव्यस्यात्मनि संगिनि रसादिरूपेऽर्थे न कस्यचिद् विमतिः ।

प्रतीयमानस्यार्थस्य काव्येषु प्राधान्यं भवतीति, वाच्यं शब्दशक्ति मूलं प्रतीयमानञ्चार्थशक्तिमूलञ्चर्थमेव काव्यात्मानं तिपादयन्तीति स्पष्टमेव साहित्यशास्त्रीयनियम– न्यायव्यवस्थापनपरमाचार्येण श्रीमदा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नन्दवर्धनाचर्येणैवोक्तम् । वाच्य शक्त्याक्षिप्तस्यैव काव्यात्मभूतस्य प्रतीयमानस्य वस्तुनः रसार्थालङ्कार भेदेन निरूपणं विधाय उभयोः परस्परस्पर्धयोत्कर्षजनकत्वे सति सहृदयहृदयाह्लादजनकभावनाविषयत्वं व्यवस्थाप्य तदभिव्यञ्जकत्वेनार्थविशिष्टः शब्द शब्दार्थौ वा स्वीकृतः ।

"संयोगात्" रस निष्पत्ति भरताचार्यैरपि काव्ये साहित्यतत्त्वस्य काव्यधर्मत्वमुक्तम् । तदेव रसाभिव्यक्तिहेतुः ।

इत्थम् काव्ये काव्यशक्ति (प्रतिभा) काव्यवृत्ति (व्यञ्जना) सम्बन्धस्य विशेषस्य (व्यंग्य व्यञ्जकभावस्य) च प्राधान्यमस्तीति निर्विचिकित्सा स्थापना । दोषपरिहारायन्या या नियमाश्च मुख्यतः भामहदण्डिआनन्दवर्धनाचार्यैं निरूपिताः । दोषनिराकरणाय स्वपक्षस्थापनाय च साहित्यशास्त्रे न्यायशैल्याविचारस्य प्ररम्भ ध्वन्यालोकादेवेति निभ्रान्तं वक्तुमुत्सहामहे ।

ध्वनिसिद्धान्तस्य मूलोद्भावनं तु भरतकृतमेव । रससिद्धान्तोऽपि ध्वनिवादिभिः सर्वथैव स्वीक्रियते । गुणालङ्काररीतीनां काव्योत्कर्षाधायकधर्माणां वैज्ञानिकतत्थ्यपूर्णं च वर्गीकरणं ध्वनिसिद्धान्तस्यानन्तर मेव सञ्जातमिति काव्यप्रकाश एव तथ्यमेतत् प्रमाणयति । काव्य प्रकाशस्त्वभिनवगुप्तस्यमतानां व्यवस्थितं रूपम् । लोचने रसादिध्वनेर्वा, वस्त्वलङ्काररसादित्रिविधरूपध्वनेर्वा प्राधान्यमिति पक्षद्वयमप्यास्ते ।

काव्यप्रकाशकृता, पण्डितराजजगन्नथैश्च वस्त्वलंकार रसेति त्रिरुपध्वनेः काव्यात्मत्वं व्यवस्थापितम् । परन्तु विश्वनाथ रसादिध्वनेरेव काव्यात्मत्वं व्यवस्थापितवान् । तन्मते रसात्मकं वाक्यमेव काव्यं भवति ।

मतद्वयमपि लोचनमूलमेवेति ध्येयम् । लोचनकारस्य प्रभावस्तु मम्मट–जगन्नथयोरुपरिभृशं दृश्यते । साहित्यदर्पणकारस्तु आनन्दवर्धनमतमेवामनुते, खण्डयति च काव्यप्रकाशकारम् । परन्तु सर्वे ध्वनिसिद्धान्तानुयायिन एवेति निश्चप्रचम् । सिद्धान्त साम्येऽपि मतभेदस्तु स्वोपज्ञातमेव विभर्तीति नात्र विकासवादगन्धोऽपि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विकासवादिनामपि रीत्या साहित्यशास्त्रे प्रायोऽप्ययथावदुंपलब्धानां ग्रन्थानामध्ययनं सञ्जातम् । परन्तूपक्रमोपसंहारन्यायेन तेषांमतानां सारस्तु नातीवास्मान् विरुणद्धि ।

यावता शास्त्रीयसिद्धान्तानुकूलास्तावताधुनिकानामपि विचारः स्वागतार्हं एव । साहित्यशास्त्रस्यान्तरसमीक्षया तु प्रायः साहित्यशास्त्रीय नियमन्यायानां प्रामाणिकता, स्थिररूपैव विज्ञायते ।

भामहः दण्डी, वा साहित्यशास्त्रस्य प्रारम्भकाराः इत्येवमतं वयं नाद्रियामहे । नाट्यशास्त्रं, अग्निपुराणम्, महाभारतम्, विष्णुपुराणम् अन्यानि च महाकाव्यानिनिर्मितानि तेषां पुरतः साहित्यशास्त्रं नास्तीति-सर्वथास्माभिरुत्प्रेक्ष्यते ।

साहित्यशास्त्रस्य परम्परायाः ऐतिहासिकं नूनमेवाधुनिकैरपि ख्यापितास्तेऽपि धन्यवादपात्राण्येव ।

□

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सन्दर्भग्रन्थानां सूचिः

१. अग्निपुराण— (अग्निऋषि) व्यास
२. अभिनवभारती— अभिनवगुप्त
३. अलङ्कारकौस्तुभ— कविकर्णपूर
४. अलङ्कारमुक्तावली— विश्वेश्वर
५. अलङ्कारोंका क्रमिक विकास— पुरुषोत्तम शर्मा चतुर्वेदी
६. अलङ्कारशेखर— केशवमिश्र
७. अष्टाध्यायी— पाणिनि
८. औचित्यविचारचर्चा— क्षेमेन्द्र
९. उज्ज्वलनीलमणि— रूपगोस्वामी
१०. उद्भटालङ्कारसंग्रहवृत्ति— भट्टनायक
११. काव्यादर्श— दण्डी
१२. काव्यालङ्कारसारसंग्रह— उद्भट
१३. काव्यालङ्कार— भामह
१४. काव्यमीमांसा— भट्टनायक
१५. काव्यानुशासन— हेमचन्द्र
१६. काव्यानुशीलन— वाग्भट
१७. काव्यालङ्कारसूत्रवृत्ति— वामन
१८. काव्यालङ्कार— रुद्रट
१९. काव्यमीमांसा— राजशेखर
२०. काव्यप्रकाश — मम्मट
२१. काव्यप्रदीप— गोविन्द ठक्कुर
२२. कामसूत्र -- वात्स्यायन
२३. कुवलयानन्द— अप्पय्यदीक्षित
२४. चन्द्रालोक— जयदेव
२५. दशरूपक— धनञ्जय
२६. दी अलङ्कार नेक्सन अफ अग्निपुराण — डा. सुरेशमोहन भट्टाचार्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२७. छन्दसूत्र — पिंगल
२८. ध्वन्यालोक — अभिनवगुप्त
२९. नाट्यशास्त्र — भरत
३०. नाटकलक्षणात्मक कोष — सागरनन्दी
३१. नाट्यदर्पण — गुणचन्द्र
३२. न्यायकौस्तुभ
३३. प्रतापरुद्रयशोभूषण — विद्यानाथ
३४. प्रपञ्चसारपटल — श्रीजगद्गुरु शंकराचार्य
३५. भावप्रकाश — शारदातनय
३६. मार्कण्डेयपुराण
३७. रसार्णवसुधाकर — सिंहभूपाल
३८. रसगंगाधर — श्री जगन्नाथ
३९. वक्रोक्तिजीवित — कुन्तक
४०. विदग्धमुखमण्डनकाव्य — केशवमिश्र
४१. व्यक्तिविवेक — महिमभट्ट
४२. सरस्वतीकण्ठाभरण — भोज
४३. साहित्यदर्पण — विश्वनाथ
४४. सांख्यसूत्र
४५. शृङ्गारप्रकाश — भोज
४६. शृङ्गारतिलक — रुद्रभट्ट
४७. शब्दकौस्तुभ — भट्टोजिदीक्षित
४८. शृङ्गारप्रकाश — भोज
४९. श्रीमद्भगवद्गीता

□

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu